BHAASA NATAKA CHAKRAM

PRATHINJAYOUGANDHARAYANAM

(Under the Project of Content Generation with a view to develop
E-Databank, E-Learning and E-Sources of Sanskrit Text.)

Chief Director

Prof. RADHA VALLABH TRIPATHI
Vice Chancellor

Director

Prof. K. T. MADHAVAN
Principal, Rashtriya Sanskrit Sansthan, Guruvayoor Campus

National Coordinator

Dr. SHUKLA MUKHERJEE
Project Officer
(RSKS,New Delhi)

Coordinator

Dr. E. M. RAJAN

Asst. Coordinator

Dr. P. INDIRA
Department of Sahitya
Rashtriya Sanskrit Sansthan,
(Deemed University)
Guruvayoor Campus, Puranattukara

भास्सनाटकचक्रम्

प्रतिज्ञायौगन्धरायणम्

भारतसर्वकारस्य योजना (Content Generation with a view to develop E-Databank, E-Learning and E-Sources of Sanskrit Text.)

प्रधाननिदेशकः

आचार्य राधावल्लभत्रिपाठी

कुलपतिः

निदेशकः

आचार्य के.टि. माधवः

प्राचार्यः, गुरुवायूर् परिसरः

राष्ट्रियसंयोजिका

डा. शुक्ला मुखर्जी

परियोजनाधिकारी

राष्ट्रिय संस्कृत संस्थानम्, नवदेहली

प्रधानसंयोजकः

डा. इ. एम्. राजन्,

परिसरसाहित्यविभागाध्यक्षः, गुरुवायूर् परिसरः

उपसंयोजिका

डा. पि. इन्दिरा

राष्ट्रिय संस्कृत संस्थानम्,

(मानित विश्वविद्यालयः)

गुरुवायूर् परिसरः पुरनाट्टुकरा।

आमुखम् - प्रतिज्ञायौगन्धरायणम्

वत्सराजोदयनवृत्तान्तमवलम्ब्य लिखितं नाटकं प्रतिज्ञयौगन्धरायणम्। उदयनस्य मन्त्री यौगन्धरायणः सालकेन सह आगच्छति। अनयोर्वार्तालापादिदमवगम्यते पद्राजा उदयनः नागवनं गमिष्यति। तत्र महासेनः प्रद्योतस्तं बन्दिनं कर्तुं प्रयासं विधास्यति। यौगन्धरायणः पत्रं रक्षासूत्रञ्च दत्वा सालकं प्रेषयितुं वाञ्छति। सः राजमातुः सकाशे रक्षासूत्रं पृछति। एतस्मिन्नवसरे उदयनस्याङ्गरक्षकः आगच्छति वदति च यद्राजा उदयनं प्रभातएव नागवनङ्गतः। तत्र स एकं कृत्रिमं गजं पश्यति। तदज्ञात्वा स तत्समीपं गच्छति। ततः प्रद्योतस्य सैनिका आगत्य युद्धे उदयनं बद्ध्वा उज्जयिनीं नयन्ति। एतद्वत्तान्तं ज्ञात्वा यौगन्धरायणः प्रतिज्ञां करोत्यहम् उदयनं ततः मोचयामि। तदा तत्र महर्षिः व्यास आगत्य एकं वस्त्रं ददाति। तेन वस्त्रेण यौगन्धरायणः वेषपरिवर्तनं विधत्ते ।।

बहवः राजानः प्रद्योतपुत्रीं वासवदत्तां पत्नीत्वेन वाञ्छन्ति। काशिराजः अस्मिन् विषये उपाध्यायं जैवान्तिं प्रेषयति। राजा प्रद्योतः कञ्चुकीयेन सह वासवदत्ताविवाहेवार्तां विधत्ते। राजमहिषी महासेनमाह्वयति वदति च वासवदत्ता वीणावादनमभ्यस्तुं वैतालिकस्य समीपङ्गता। कञ्चुकी आगत्य वदति वत्सराजः बन्दी संवृत्त इति। प्रद्योतः वत्सराजं यथाविधि अन्तः पुरमानयति। राजमहिषी वदति उदयनः वासवदत्तायाः योग्यः वर इति। वत्सराजस्य घोषवटी नाम वीणा वर्तते। एतां वासवदत्तायै ददाति।

वत्सराजस्य विदूषकः मन्त्री रूमण्वान्, यौगन्धरायणश्च वेषंपरिवर्तयन्तः आगच्छन्ति। रूमण्वान् श्रमणकस्य यौगन्धरायणः उत्मत्तकस्य च वेषं स्वीकृतवन्तौ। ते सर्वे सङ्केतभाषया वार्तालापं कुर्वन्ति। रुमण्वान् मध्याह्नेऽग्तिगृहं प्रविशति। विदूषकं आगत्य वदति यत्सः उदयनं दृष्टवान्। तत्र यौगन्धरायणः प्रतिज्ञां करोति यदर्जुनः सुभद्रामिव राजा वासवदत्तां नापहरति तदा मम नाम यौगन्धरायण इति नास्ति। पुनश्च प्रतिज्ञां करोति - घोषवतीं वीणां नीलगिरिं गजं, वासवदत्तां, राजानञ्च स्वीकृत्य कौशाम्बीं न गच्छामि नाहं यौगन्धरायण इति।।

वत्सराजस्य गुप्तचरः गात्रसेवक आगच्छति। सोऽपि वेषपरिवर्तनेन प्रद्योतहस्तिनः भद्रवतः हस्तिपको जातः। सः हस्तिनो मार्गमजानन् तं मार्गयति। अतः सः मद्यपमनुकरोति। तस्मिन् समये उदयनः वासवदत्तामपहृत्यगत इति वार्ताप्रसराति। वत्सराजगमनानन्तरं युद्धं प्रवर्तते। युद्धे यौगन्धरायणः बन्दी जायते। किन्तु तस्य दुःखं नास्ति यतो हि तस्य स्वामी मुक्तः। शस्त्रागारे प्रद्योतस्यामात्यः भरतरोहकः यौगन्धरायणं मिलति। भरतरोहकः वत्सराजस्य कर्मणि निन्दां प्रस्तौति। यौगन्धरायणस्समाधत्ते। भरतहोरकः श्रृङ्गाराख्यं स्वर्णपात्रं तस्मै ददाति। प्रथमं यौगन्धरायणः तिरस्करोति। परञ्जानाति प्रद्योतः वत्सराज - वासवदत्तयोर्विवाह मङ्गीचक्र इति तदास्वीकरोति।।

आस्मिन् नाटके नायकः यौगन्धरायणः। यौगन्धरायणः प्रतिज्ञात्रयं विधत्ते। अत एव प्रतिज्ञा यौगन्धरायणमिति नामास्य दत्तम्। वत्सराजस्य कथा बृहत्कथामञ्जर्यां तथा सरिसागरे चोपलभ्यते। अत्र वीर अङ्गी रसः। हास्यः, श्रृङ्गारः, भयानकचाङ्गरसाः ।।

ऐदंप्राथम्येन संस्थानेनायं प्रोजक्ट् पद्धतिः विविधपरिसरेषु आयोज्यते। तत्र गुरुवायूर्परिसरस्य कृते साहित्ये नारायणीयं भासनाटकचक्रञ्च दत्तमस्ति। एतच्च राष्ट्रियसंस्कृतसंस्यानस्य मानितविश्वविद्यालयस्य कुलपतीनां आचार्याणां राधावल्लभत्रिपाठिमहोदयानामसीमानुग्रहेण प्राप्तमिति तेभ्यः मुख्यसंपादकेभ्यः कृतज्ञताप्रसूनमालास्समर्प्यन्ते। एतस्य भासनाटकचक्रस्य सम्पादकाः आचार्याः परिसरप्राचार्याः प्रोफसर् के. टि.माधवन्महाभागा इति तेभ्योऽपि धन्यवादसुमनोमाल्यानि वितीर्यन्ते। एतस्याशुद्धिनिरीक्षणं विभागीयाः डा. पि. इन्दिरा, डा. सि. एस्. शान्ता, डा. पी. वि. श्रीदेवी, श्री. ए. एम्. सि. त्रिविक्रमन् नम्बूतिरि श्चाकुर्वन्, टङ्कणं डाटा एन्ड्रि ओप्परेटर श्रीमती जोर्लिन्जोषी अकरोदिति सर्वेभ्यः हार्दं कार्तत्ज्ञं विनिवेदयामि ।।

इत्थं सहृदयविधेयः,

डा. राजन् इ. यम्.,

साहित्यविभागाध्यक्षः,

गुरुवायूर् परिसरः।

प्रतिज्ञायौगन्धरायणम् - कथापात्राणि

पुरुष-पात्राणि

यौगन्धरायणः (उन्मत्तकः)	- वत्सराजस्य मुख्यमन्त्री।
रुमण्वान् (श्रमणकः)	- वत्सराजस्य द्वितीयमन्त्री।
विदूषकः (वसन्तकः)	- वत्सराजस्य मित्रम्
हंसकः	- वत्सराजस्य सेवकः।
सालकः	- यौगन्धरायणस्य अनुचरः एवं सन्देशवाहकः।
निर्मुण्डकः	- यौगन्धरायणस्य भृत्यः।
ब्राह्मणः	- यौगन्धरायणस्य मित्रम्।
भटः	-
गात्रसेवकः	-
प्रद्योतः (महासेनः)	- उज्जयिनीराजाः।
भरतरोहकः	- महासेनस्य प्रधानमंत्री।
बादरायणः	-

स्त्री-पात्राणि

अङ्गारवती	- महासेनस्य राणी।
विजया	- वत्सराजस्य प्रतीहारी।

प्रतिज्ञायौगन्धरायणम्

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः - पातु वासवदत्तायो महासेनोऽतिवीर्यवान् ।

वत्सराजस्तु नाम्ना सश, श्क्तिर्यौगन्धरायणः ।।

(परिक्रम्य नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत् ।

(प्रविश्य)

नटी - अय्य! इअम्हि । (आर्य! इयमस्मि ।)

सूत्रधार - आर्ये! गीयतां तावत् किञ्चिद् वस्तु । ततस्तव गीतप्रसादिते रङ्गे वयमपि प्रकरणमारभामहे। आर्ये! किमिदं चिन्त्यते । ननु गीयते ।

नटी - अज्ज मए सिविणे ञ्आदिकुलस्स अस्सत्थं विअ दिट्ठं । ता इच्छामि अय्येण कुसलविञ्आणणिमित्तं कञ्चि पुरुसं पेसिदुं । (अद्य मया स्वप्ने ज्ञातिकुलस्यास्वास्थ्यमिव दृष्टम् । तदिच्छाम्यार्येण कुशलविज्ञाननिमित्तं कञ्चित् पुरुषं प्रेषयितुम् ।)

सूत्रधारः - बाढम् ।

पुरुषं प्रेषयिष्यामि व्यक्तमात्महिते क्षमम् ।

सूत्रधारः - पुरुषं प्रेषयत्येष यथा यौगन्धरायणः ।।

सूत्रधारः - पुरुषं प्रेषयत्येव यथा यौगन्धरायणः ।।

(निष्क्रान्तौ ।)

इति स्थापना

(ततः प्रविशति यौगन्धरायणः सालकेन सह ।)

यौगन्धरायणः - सालक! सज्जस्त्वम् ।

सालकः - अय्य! अह इं। (आर्य अथ किम् ।)

यौगन्धरायणः - महान् खल्वध्वा गन्तव्यः ।

सालकः - महत्तरेण सिणेहेण अय्यं उवचिट्ठामि । (महत्तरेण स्नेहेनार्यमुपतिष्ठे ।)

यौगन्धरायणः - हन्त यास्यति बलवान् यस्य सौहार्दम् । कुतः,

स्निग्धेष्वासज्यं कर्म यद् दुष्करं स्याद्
यो वा विज्ञाता सत्कृतानां गुणानाम् ।
क्रीतं सामर्थ्यं यस्य तस्य क्रमेण
दैवप्रामाण्याद् भ्रश्यते वर्धते वा ।। ३ ।।

अथ वेणुवनाश्रितेषु नागवनं श्वः प्रयाता स्वामी प्रागेव सम्भावयितव्यः।

सालकः - अय्य! लेहो खु मं ओबज्झइ, जहिं आअत्तं कय्यसरीरं । (आर्य लेखः खलु मामपक्हति, यस्मिन् आयत्तं कार्यशरीरम् ।)

यौगन्धरायणः - विजये!

(प्रविश्य)

विजया - अय्य इअम्हि । (आर्य! इयमस्मि।)

यौगन्धरायणः - विजये! त्वर्यतां लेखः प्रतिसरा च ।

विजया - अय्य! तह। (निष्क्रान्ता।) (आर्य! तथा।)

यौगन्धरायणः - अथ दृष्टपूर्वस्त्वयैष पन्थाः ।

सालकः - णहि, सुदपुरुवो। (नहि, श्रुतपूर्वः ।)

यौगन्धरायणः - एतदपि मेधाविलक्षणम्। भोः ! वनगजप्रच्छादितशरोरं नीलहस्तिनमुपन्यस्य प्रद्योतः स्वामिनं छलयितुकाम इति प्रवृत्तिरुपगता नः। अपीदानीं स्वामिनो बुद्ध्ययतिक्रमो न स्यात् । अहो नु खलु वत्सराजभीरुत्वं प्रद्योतस्य। व्यक्तीकृतमसामर्थ्यमक्षौहिण्याः । कुतः,

व्यक्तं बलं बहु च तस्य न चैककार्य
संख्यातवीरपुरुषं च न चानुरक्तम् ।
व्याजं ततः समभिनन्दति युद्धकाले
सर्वं हि सैन्यमनुरागमृते कलत्रम् ।। ४ ।।

(प्रविश्य)

विजया - लेहो खु अअं। पडिसरा सव्ववहूजणहत्थादो तुवारीअदित्ति भट्टिमादा आह। (लेखः खल्वयम्। प्रतिसरा सर्ववधूजनहस्तात् त्वर्यत इति भर्तृमाता आह)

यौगन्धरायणः - विजये! विज्ञाप्यतां तत्रभवत्यै-सर्ववधूजनहस्तप्रयुक्ता वा एका वा प्रतिसरा दीयतामिति।

विजया - अय्य! तह । (निष्क्रान्ता ।) आर्य तथा।)

(प्रविश्य)

निर्मुण्डकः - सुहं अय्यस्स । (सुखमार्यस्य)

यौगन्धरायणः - कथं निर्मुण्डकः ।

निर्मुण्डकः - अय्य! एसो भट्ठिपादमूलादो ओवट्ठिइओ हंसओ आअदो। (आर्य! एष भर्तृ पादमूलादौपस्थितिको हंसकः आगतः ।)

यौगन्धरायणः - कथा हंसक एकः प्राप्त इति। सालक! विश्रमम्यतामिदानीं मुहूर्तम्। त्वरिततरं वा यास्यसि सविश्रमो वा।

सालकः - अय्य! तह। (निष्क्रान्तः ।) (आर्य! तथा।)

यौगन्धरायणः - स्वामिनाविरहितपूर्वो हंसक एकः प्राप्त इति साविग्नमिव मे मनः। कुतः,

यथा नरस्याकुलबान्धवस्य
गत्वान्यदेशं गृहमागतस्य ।
तथा हि मे सम्प्रति बुद्धिशङ्का
श्रोष्यामि किन्नु प्रियमप्रियं वा ।। ५ ।।

(ततः प्रविशति हंसको निर्मुण्डकश्च।)

निर्मुण्डकः - एदु एदु अय्यो। (एत्वेत्वार्य।)

हंसकः - कहिं कहिं अय्यो । (कुत्र कुत्रार्यः।)

निर्मुण्डकः - एसो अय्यो। चिट्ठइ, उवसप्पदु णं । (निष्क्रान्तः।) एष आर्यस्तिष्ठति उपसर्पत्वेनम्।)

हंसकः - (उपसृत्य) सुहं अय्यस्य । (सुखमार्यस्य।)

यौगन्धरायणः - हंसक! न खलु गतः स्वामी नागवनम्।

हंसकः - अय्य! हिज्जो एव्व गदो भट्टा। (आर्य! ह्य एव गतो भर्ता।)

यौगन्धरायणः - हन्त निष्फलमनुप्रेषणम् । छलिताः स्मः । अथास्ति प्रत्याशा अथवा अद्यैव प्राणा मोक्तव्याः।
हंसकं धरदि खु दाव भट्ठा। (धरते खलु तावद् भर्ता।)

यौगन्धरायणः - धरते तावदित्यनूर्जिता विपत्तिरभिहिता। गृहीतेन स्वामिना भवितव्यं ननु।

हंसकः - सुट्ठु अय्येण विञ्आदं। गहीदो भट्ठा। (सुष्ठु आर्येण विज्ञातम्। गृहीतो भर्ता।)

यौगन्धरायणः - कथं गृहीतः स्वामी। हन्त भोः! महान् खलु भारः प्रद्योतस्य भाग्यैर्निस्तीर्णः। अद्यप्रभृति वत्सराजसचिवानां प्रतिष्ठितमसामर्थ्यमयशश्च । इदानीमनुत्पन्नकार्यपण्डितो रुमण्वान् क्व गतः। इदानीमश्वारोहणीयं क्व गतम्। कुतः,

स्निग्धं च सौहृदहृतं च कुलोद्‌गतं च
व्यायमयोग्यपुरुषं च गुणार्जितं च।
क्रीतं परैर्गहनदुर्गतया प्रनष्टं
युद्धे समस्तमतिभारतया विपन्नम्।। ६ ।।

हंसकः - जइ समग्गजोहबलपरिवारो भवे भट्ठा, ण एसो दोसो भवे। (यदि समग्रयोधबलपरिवारो भवेद् भर्ता, नैष दोषो भवेत्।)

यौगन्धरायणः - कथमसमग्रयोधबलपरिवारो नाम स्वामी।

हंसकः - सुणादु अय्यो। (शृणोत्वार्यः।)

यौगन्धरायणः - अध्वश्रान्तो भवान्। आस्यताम्।

हंसकः - अय्य! तह। (उपविश्य) सुणादु अय्यो। सावसेसपच्चूसाए रअणीए वाहणसुहाए वेलाए वालुअतित्थेण णइं णम्मदं तरिअ वेणुवणे कलत्तं आवासिअ छत्तमत्तपरिच्छदेण गजजूहविमजोग्गेण बलेण मग्गमदअणीए वीहीए णाअवणं पआदो भट्टा । (आर्य! तथा शृणोत्वार्यः । सावशेषप्रत्यूषायां रजन्यां वाहनसुखायां वेलायां वालुकातिर्थेन नदीं नर्मदां तीर्त्वा वेणुवने कलत्रमावास्य छत्रमात्रपरिच्छदेन गजयूथविमर्दयोग्येन बलेन मार्गमदन्या वीथ्या नागवनं प्रयातो भर्ता।)

यौगन्धरायणः - ततस्ततः ।

हंसकः - तदो इसक्खेवमत्तोत्थिदे सुय्ये एत्तिअमत्ताणि विअ जोअणाणि गेच्छिअ कोसमत्तेण विअ मदअंधीरपव्वदं अणासादिअ तडाअङ्कुक्खित्तं अद्धणिम्मिदसिलाकम्मं विअ विसमदंसणं दिट्ठ णो णाअजूहं। (तत इषुक्षेपमात्रोत्थिते सूर्ये इयन्मात्राणीव योजनानि गत्वा क्रोशमात्रेणेव मदगन्धीरपर्वतमनासाद्य तटाकपङ्कोत्क्षिप्तमर्धनिर्मितशिलाकर्मेव विषमदर्शनं दृष्टं नो नागयूथम्।)

यौगन्धरायणः - ततस्ततः।

हंसकः - तदो णिज्झाअन्तीसु सेणासु समुप्पण्णसङ्कापिण्डिदे तस्सिं जूहे इमस्स अणत्थस्स उप्पादओ कोच्चि पदादी भट्टारं एव्वं उवट्ठिदो। (ततो निध्यायन्तीषु सेनासु समुत्पन्नशङ्कापिण्डिते तस्मिन् यूथेऽस्यानर्थस्योत्पादकः कश्चित् पदातिः भर्तारमेवोपस्थितः।)

यौगन्धरायणः - तिष्ठ। इतः क्रोशमात्रे मल्लिकासालप्रच्छादितशरीरो नखदन्तवर्जमेकनीली हस्ती मया दृश्यत इत्युक्तवान् ननु।

हंसकः - कहं परिण्णादं खु एदं अय्येण। जागत्ति खु समुप्पणो अअं दोसो। (कथं परिज्ञातं खल्वेतदार्येण। जाग्रति खलु समुत्पन्नोऽयं दोषः।)

यौगन्धरायणः - हंसक! जाग्रतोऽपि बलवत्तरः कृतान्तः। ततस्ततः।

हंसकः - तदो सुवण्णसदप्पदाणेण तं णिससं पडिपूजिअ भट्टिणा उत्तं अत्थि एसो चक्कवट्टी हत्थी णीलकुवलअतणू णाम हत्थिसिक्खाए पठिदो। ता अप्पमत्ता होह तुम्हे इमिस्सि जूहे। गअं तं अहं वीणादुदीओ आणेमित्ति। (ततः सुवर्णशतप्रदानेन तं नृशंसं प्रतिपूज्य भर्त्रोक्तम्-अस्त्येष चक्रवर्ती हस्ती नीलकुवलयतनुर्नाम हस्तिशिक्षायां पठितः। तद् अप्रमत्ता भवत यूयमस्मिन् यूथे। गजं तमहं वीणाद्वितीय आनयामीति।)

यौगन्धरायणः - अथ कथमुपेक्षितस्तदानीं स्वामी रुमण्वता।

हंसकः - णहि णहि। पसादिअ भट्टा अमच्चेण विण्णाविदो-णहु दे एलावणादीणं वि दिसागआणं गहणं ण सम्भावणीअं। अविदु दुरारक्खदाए आसण्णदोसाणि विसअन्तराणि। तहिं णिल्लज्जो णिरभिजणो पच्चन्तवासी जणो। ता पदादिमत्ताहिट्ठिदं इमं जूहं करिअ सव्व एव्व गच्छामो, ण एकाइणा सामिणा गन्तळां त्ति। (नहि नहि। प्रसाद्य भर्तामात्येन विज्ञापितः- न खलु ते ऐरावणादीनामपि दिग्गजानां ग्रहणं न सम्भावनीयम्। अपितु दुरारक्षतयासन्नदोषाणि विषयान्तराणि। तत्र निर्लज्जो निरभिजनः प्रत्यन्तवासी जनः। तत् पदातिमात्राधिष्ठितमिदं यूथं कृत्वा सर्व एव गच्छामः, नैकाकिना स्वामिना गन्तव्यमीति।)

यौगन्धरायणः - अपि महाजनसमक्षमेवमुक्तः स्वामी रुमण्वता। एवमप्यवक्तव्यां स्वामिभक्तिमिच्छामि। ततस्ततः।

हंसकः - तदो अत्तजीविदणिद्दिट्ठेण सवहेण णिवारिअ अमच्चं णीलबलाहआदो हत्थिणो ओदरिअ सुन्दरपाडलं णाम अस्सं आलुहिअ अणद्धागए सुय्ये विसदिमत्तेहि पदादिहि सह पआदो भट्टा। (तत आत्मजीवितनिर्दिष्टेन शपथेन निवार्यामात्यं नीलबलाहकाद् हस्तिनोऽवतीर्य सुन्दरपाटलं नामाश्वमारुह्यानर्धागते सूर्ये विंशतिमात्रैः पदातिभिः सह प्रयातो भर्ता ।)

यौगन्धरायणः - विजयाय। हा धिक्, स्नेहात् पूर्ववृत्तान्तो नावेक्षितः। ततस्ततः।

हंसकः - तदो दिउणं विअ अद्धाणं गच्छिअ साललुक्खच्छाआए सवण्णणट्ठणीलदाए परुब्भासिदेहि असरीरविणिक्खित्तेहि विअ दन्तजुअलेहि सूइदो धणुसदमत्तेण विअ दिट्ठो सो दिव्ववारणपडिच्छन्दो। (ततो द्विगुणमिवाध्वानं गत्वा सालवृक्षच्छायायां सावर्ण्यनष्टनीलतया प्रोद्भासिताभ्यमिशरीरविनिक्षिप्ताभ्यामिव दन्तयुगलाभ्यां सूचितो धनुःशतमात्रेणेव दृष्टः स दिव्यवारणप्रतिच्छन्दः।)

यौगन्धरायणः - हंसक! अस्मत्परिताप इत्युच्यताम्। ततस्ततः।

हंसकः - तदो भट्टिणा ओदरिअ अस्सादो आअमिअ देवदाणं पणामं करिअगहीदा वीणा। तदो पिट्ठदो एक्ककिदणिच्चओ विअ महन्तो कण्ठीरवो समुप्पण्णो (ततो भर्त्रावतीर्याश्वादागम्य देवतानां प्रणामं कृत्वा गृहीता वीणा। ततः पृष्ठत एककृतनिश्चय इव महान् कण्ठीरवः समुत्पन्नः।)

यौगन्धरायणः - कण्ठीरव इति। ततस्ततः ।

हंसकः - तदो कण्ठीरवपरिञ्आणणिमित्तं परिवुत्ता अ वअं। महामत्तोत्तराउहीआहिट्ठिदो पच्चुग्गदो सो किदअहत्थी (ततः कण्ठीरवपरिज्ञाननिमित्तं परिवृत्ताश्च वयम्। महामात्रोत्तरायुधीयाधिष्ठितः प्रत्युद्गतः स कृतकहस्ती।)

यौगन्धरायणः - ततस्ततः।

हंसकः - तदो णामगोत्तग्गहणेण समस्सासिअ कुलवुत्तजणं सव्वहा पज्जोदप्पओओ एसो, अणुगच्छह मं, अहं दाणिं परस्स उवण्णासं विसमारम्भं परक्कमेण समीकरोमि त्ति भणिअ भट्टा पविट्ठो एव्व तं परबलं (ततो नामगोत्रग्रहणेन समाश्वास्य कुलपुत्रजनं सर्वथा प्रद्योतप्रयोग एषः, अनुगच्छत माम्, अहमिदानीं विषमारम्भं परस्योपन्यासं पराक्रमेण समीकरोमीति भणित्वा भर्ता प्रविष्ट एव तत् परबलम्।)

यौगन्धरायणः - प्रविष्ट इति। अथवा ननु स्थाने,

व्रीलितो वञ्चनां प्राप्य मानी सत्वमुपाश्रितः।
शूरश्चैकायनस्थश्च किमन्यत् प्रतिपद्यते ।। ५

ततस्ततः।

हंसकः - तदो कीलाअमाणो विअ अत्तच्छन्दाणुवत्तिणा सुन्दरपाडलेण अस्सेण अत्ताभिप्पाआदो वि अहिअं पहरन्तो अदिबहुकदाए परबलस्स अदिप्पउज्जमाणवाआमो विसण्णणाट्ठसव्वपरिजणो मए एक्काइणा, णहि णहि भट्टिणा एव्व रक्खिअमाणो अणुबद्धदिवसजुद्धपरिस्सन्तो बहुप्पहारणिपडिअतुरओ तम्माअमाणासुय्थदारुणाए वेलाए मोहं गदो भट्ठा। (ततः क्रीडन्निवात्मच्छन्दानुवर्तिना सुन्दरपाटलेनाश्वेनात्माभिप्रायादप्यधिकं प्रहरन् अतिबहुकतया परबलस्यातिप्रज्युमानव्यायामो विषण्णनष्टसर्वपरिजनो मयैकाकिना, नहि नहि, भर्त्रैव रक्ष्यमाणोऽनुबद्धदिवसयुद्धपरिश्रान्तो बहुप्रहारनिपतिततुरगस्ताम्यत्सूर्यदारुणायां वेलायां मोहं गतो भर्ता।)

यौगन्धरायणः - कथं मोहमुपगतः स्वामी। ततस्ततः।

हंसकः - तदो जहासत्ति सण्णिहिदगहणुप्पाडिदाहि अविण्णअमाणजादीहि कक्कसाहि लदाहि पाकिदो विअ सरीरअन्तणादो पहरिसिदो भट्टा। (ततो यथाशक्ति सन्निहितगहनोत्पाटिताभिरविज्ञाय- मानजातिभिः कर्कशाभिर्लताभिः प्राकृत इव शरीरयन्त्रणात् प्रधर्षितो भर्ता।)

यौगन्धरायणः - कथं प्रधर्षितः स्वामी।

पीनांसस्य विकृष्टपर्वमहतो नागेन्द्रहस्ताकृते-
श्चापास्फालिकरस्य दूरभरणाद् बाणाधिकारोपिणः।

विप्राभ्यर्चयितुः - श्रमेषु सुहृदां सत्कर्तुरालिङ्गनै-

न्र्यस्तं तस्य भुजद्वयस्य, वलयस्थानान्तरे बन्धनम्।।
अथ कस्यां वेलायां प्रत्यागतप्राणः स्वामी। ८

हंसकः - अय्य! अवसिदावलेवेसु पावेसु। (आर्य! अवसितांवलेपेषु पापेषु।)

यौगन्धरायणः - दिष्टचा शरीरं घर्षितं न तेजः। ततस्ततः

हंसकः - तदो पच्चाअदप्पाणं दाणि भट्टारं पेक्खिअ अणेण मम हदो अणेण मम पिदा अणेण मम सुदो मम वउस्सो त्ति अञ्ञहा भट्टिणो

परक्कमं वण्णउन्ता सव्वदो अभिद्दुदा दे पावा। ततः प्रत्यगतप्राणमिदानीं भर्तारं प्रेक्ष्यानेन मम भ्राता हतोऽनेन मम पितानेन मम सुतः तो अनेन मम वयस्य इति अन्यथा भर्तुः पराक्रमं वर्णयन्तः सर्वतोऽभिद्रुतास्ते पापाः।)

यौगन्धरायणः - ततस्ततः।

हंसकः - अण्णं च दाणि अच्चरिअं! अञ्ञाञ्ञणुणएण तर्हि एक्को ववसिदो अकय्यं कत्तुं। सो दक्खिणाहिमुहं परिवत्तिअ भट्टारं समरवाआमसंखोहिदाणि णिरुवआरं संखिविअ केसाणि पीडिअ करेण करवालं पहारवेगं उप्पादइदुकामो आधावन्तो (अन्यच्चेदानीमास्चर्यम्। अन्योन्यानुनयेन तत्रैको व्यवसितोऽकार्यं कर्तुम्। स दक्षिणाभिमुखं परिवर्त्य भर्तारं समख्यायामसंक्षोभितान् निरुपचारं संक्षिप्य केशान् पीडयित्वा करेण करवालं प्रहारवेगमुप्पा दयितुकाम आधावन-)

यौगन्धरायणः - हंसक! वृत्तान्तं तावदवधारय, यावदहमुच्छ्वसामि ।

हंसकः - तदो ठ्ठुहिठ्ठपडपिच्छिठ्ठाए भूमीए सो णिसंसओ सएण वेएण ओधट्टिदचणो पडिहदारम्भो हदो पडिदो। (ततो रुधिरपटलपिच्छिलायां भूमौ स नृशंसःस्वेन वेगेनावघट्टितचरणः प्रतिगतारम्भो हतः पतितः।)

यौगन्धरायणः - पतितः पाप एषः। भोः!

परचक्रैरनाक्रान्ता धर्मसङ्करवर्जिता।
भूमिर्भर्तारमापन्नं रक्षिता परिरक्षति ।। ९

हंसकः - तदो भट्टिणा पुढमं कुन्तप्पहारजणिदरोहो सालङ्काअणो णाम पज्जोदस्स अमच्चो मा खु मा खु साहसं भणिअ तं देसं उवट्ठिदो। (ततो भर्त्रा प्रथमं कुन्तप्रहारजनितमोहः शालङ्कायनो नाम प्रद्योतस्यामात्यो 'मा खलु मा खलु साहसमि'ति भणित्वा तं देशमुपस्थितः।)

यौगन्धरायणः - ततस्ततः।

हंसकः - तदो तक्कालदुल्लहं पणामं करिअ सरीरअन्तणादो तेण मोइदो भट्टा (ततस्तत्कालदुर्लभं प्रणामं कृत्वा शरीरयन्त्रणात् तेन मोचितो भर्ता।)

यौगन्धरायणः - विमुक्तः स्वामी। साधु भोः शालङ्कायन! साधु। अवस्था खलु नाम शत्रुमपि सुहृत्त्वे कल्पयति। हंसक! व्यसनात् किञ्चदुच्छ्वसितमिव मे मनः। अथ किं प्रतिपन्नं तेन साधुना।

हंसकः - तदो तेण अय्येण अणेअं सोवआरं सन्तिवअणं भणिअ गाढबहुप्पहारदाए असमत्थो वाहणासणत्ति खन्धसअणं आरोविअ उज्जइणिं एव्व णीदो भट्टा। (ततस्तोनार्योणानेकं सोपचारं शान्तिवचनम् भणित्वा गाढबहुप्रहारतयासमर्थे वाहनासन इति स्कन्धशयनमारोप्योज्जयिनीमेव नीतो भर्ता।)

यौगन्धरायणः - नीतः स्वामी। एष सोऽनर्थः,

एतत् तन्यङ्गमस्माकमेष सोऽतिमनोरथः।
प्रद्योतस्य मनस्वित्वात् स्वामी दुःखेषु वर्तते।। २०

अथ,

कथमगणितपूर्वं द्रक्ष्यते तं नरेन्द्रः कथमपुरुषवाक्यं श्रोष्यते सिद्धवाक्यः।
कथमविषयवन्ध्यं धारयिष्यत्यमर्षं प्रणिपतति निरुद्धः सत्कृतो घर्षितो वा।। २२

(प्रविश्य)

प्रतिहारी - अय्य! एसा पडिसरा। (आर्य! इयं प्रतिसरा।)

यौगन्धरायणः - एतानि तान्यापतितानि काले भाग्यक्षयान्निष्फलमुद्यतानि।
तुरङगमस्येव रणे निवृत्ते नीराजनाकौतुकमङ्गलानि।।

प्रतीहारी - अय्य! इमा पडिसरा। (आर्य! एषा प्रतिसरा।)

यौगन्धरायणः - विजये! स्थाप्यताम्।

प्रतीहारी - किं त्ति भट्टिमादरं णिवेदेमि। (किमिति भर्तृमातरं निवेदयामि।)

यौगन्धरायणः - विजये! एवमेतत्।

प्रतीहारीः - किं एदं। (किमेतत्।)

यौगन्धरायणः - इदम्।

प्रतीहारी - भणादु भणादु अय्या भणादु । (भणतु भणत्वार्यो भणतु।)

यौगन्धरायणः - अथवा नैतच्छक्यं परिहर्तुम्। निवेदयिष्याम्यत्रभवत्यै। विजये! स्थिरीक्रियतामात्मा। (कर्णे) एवमिव।

प्रतीहारी - हा।

यौगन्धरायणः - विजया खल्वसि।

प्रतीहारी - एसा गच्छामि मन्दभाआ । (एषा गच्छामि मन्दभागा।)

यौगन्धरायणः - विजये! न खलु त्वयात्रभवत्यै गृहीतः स्वामीति सहसा निवेदयितव्यम्। स्नेहदुर्वलं मातृहृदयं रक्ष्यम्।

प्रतीहारी - कहं दाणि णिवेदेमि। (कथमिदानीं निवेदयामि।)

यौगन्धरायणः - शृणु।

पूर्वं तावद् युद्धसम्बद्धदोषाः प्रस्तोतव्या भावनाः संशयानाम्।
सान्दिग्धेऽर्थे चिन्त्यमाने विनाशे रूढे शोके कार्यतत्त्वं निवेद्यम्।। १३ ।।

प्रतीहारी - घत्तिस्सं (निष्क्रान्ता।) (ग्रहीष्यामि।)

यौगन्धरायणः - हंसक! त्वमिदानीं स्वामिना किं न गतः।

हंसकः - अय्य! ववसिदो खु अहं अत्ताणं अणुग्गहिदुं सालङकाअणेण णिउत्तो। - गच्छ इमं वुत्तन्तं कोसम्बीए णिवेदेहि त्ति। (आर्य! व्यवसितः खल्वहमात्मानमनुग्रहीतुं सालङकायनेन नियुक्तः गच्छेमं वृत्तान्तं कौशाम्ब्यां निवेदयेति।)

यौगन्धरायणः - किन्नु खल्विदानीं निराशमनुसारं कर्तुकामः, उताहो स्निग्धपुरुषसन्निकर्षं परिहरति।

हंसकः - अह इं। (अथ किम्)

यौगन्धरायणः - स स्वकं विस्मयादात्मानमाविष्करोति, उत सर्वारम्भसिद्धौ रमणीयं भवति। अथ मामन्तरेण स्वामी न किञ्चिदाह।

हंसकः - अय्य! अत्थि, पदक्खिणीकरअन्तो भट्टारं अन्तज्जलावगाढाए दिट्ठीए बहुकं सदेट्ठुकामेण विअ म्हि भट्ठिणा उत्तो-गच्छ जोअन्ध- (इत्यर्धोक्ते तिष्ठति।) (आर्य! अस्ति, प्रदक्षिणीकुर्वन् भर्तारमन्तर्जलावगादया हष्टया बहुकं सन्देर्धोकामेनेवास्मि भर्त्रोक्तः- गच्छ यौगन्ध-)

यौगन्धरायणः - स्वैरममिधीयतां, स्वामिवाक्यमेतत्।

हंसकः - जोअन्धराअणं पेक्खेहि त्ति। (यौगन्धरायणं प्रेक्षस्वेति।)

यौगन्धरायणः - मा तावत्। सर्वसचिवमण्डलमतिक्रम्यैको यौगन्धरायणो द्रष्टव्य इत्याह।

हंसकः - अह इं। (अथ किम्।)

यौगन्धरायणः - तेन हि अनर्हप्रतिक्रियमनिर्विष्टभर्तृपिण्डमनुपकृतराजसत्कारं यदि खलु मां द्रष्टव्यं मन्यते स्वामी।

हंसकः - बाढं। (बाढम्।)

यौगन्धरायणः - पुरुषान्तरितं मां द्रक्ष्यति स्वामी,

रिपुनृपनगरे वा बन्धने वा वने वा
समुपगतविनाशः प्रेत्य वा तुल्यनिष्ठम्।
जितमिति कृतबुद्धिं वञ्चयित्वा नृपं तं
पुनरधिगतराज्यः पार्श्वतः श्लाघनीयम्।। १४ ।।

(नेपथ्ये)

हा हा भट्टा! (हा हा भर्तः!)

यौगन्धरायणः - एष शोकप्रतीकारो यथाशक्ति निवेद्यते।
एतत् स्त्रीभिरसामर्थ्यं मन्त्रिणामनुवर्ण्यते।। १५ ।।

(प्रविश्य)

प्रतीहारीः - अय्य! भट्टिमादा। (आर्य! भर्तृमाता।)

यौगन्धरायणः - किं किम्।

प्रतीहारी - आह।

यौगन्धरायणः - किमिति।

प्रतीहारी - एव्वंविहस्स सुहिज्जणेण परिगहिदस्स वच्छराअस्स अअं वृत्तन्तो। किं सक्कँ कत्तुं अन्तरेण विहाणं। ता सम्माणिअ सुहिज्जणं समत्थिअदु। जो खु दाणि सङ्कटेसु वा णा विसीददि, विसमगतो वा ण पय्यवचिट्ठदि, वच्छिदो वा ण णिव्वेदं गच्छदि, पडिघदेसु वा पाणा ण समुज्झदि, सो खु बुद्धिमन्तो पुच्छज्जइ पढमं एव्व मे वच्छस्स वअस्सो पच्छा अमच्चो आणेदु मे पुत्तअं पुत्तओ त्ति। (एवंविधस्य सुहृज्जनेन परिगृहीतस्य वत्सराजस्यायं वृत्तान्तः। किं शक्यं कर्तुमन्तरेण विधानम्। तत् सम्मान्य सुहृज्जनं समर्थ्यताम्। यः खल्विदानीं सङ्कटेषु वा न विषीदति, विषमगतो वा न पर्यवतिष्ठते, वञ्चितो वा न निर्वेदं गच्छति, प्रतिघातेषु वा प्राणान् न समुज्झति, स खलु बुद्धिमान् पृच्छयते प्रथममेव मे वत्सस्य वयस्यः पश्चादमात्य आनयतु मे पुत्रकं पुत्रक इति।)

यौगन्धरायणः - अहो नु खल्वत्रभवत्या राजवंशाश्रितं धीरवाक्यमभिहितम्। अत्रभवत्याः सम्भावनां पूजयामि विजये। आपस्तावत्।

प्रतीहारी - अय्य! तह। (निष्क्रम्य प्रविश्य) इमा आवो। (आर्य! तथा। इमा आपः।)

यौगन्दरायणः - आनय़ (आचर्य) विजये! किमाह तत्रभवती।

प्रतीहारी - आणेदु मे पुत्तअं पुत्तओ त्ति। (आनयतु मे पुत्रकं पुत्रक इति।)

यौगन्धरायणः - आनय। (आचम्य) विजये ! किमाह तत्रभवती।

प्रतीहारी - आणेदु मे पुत्तअं पुत्तओ त्ति। (आनयतु मे पुत्रकं पुत्रक इति।)

यौगन्धरायणः - हंसक! किमाह स्वामी।

हंसकः - जोअन्धरायण पेक्खेहि त्ति। (यौगन्धरायणं प्रेक्षस्वेति।)

यौगन्धरायणः - विजये!

यदि शत्रुबलग्रस्तो राहुणा चन्द्रमा इव।
मोचयामि न राजानं नास्मि यौगन्धरायणः।। १६ ।।

प्रतीहारी - अय्य! तह। निष्क्रान्ता ।) (आर्य! तथा।)

(प्रविश्य)

निर्मुण्डकः - अय्य! अच्छरिअं णिव्वुत्तं। भट्टिणो सन्तिणिमित्तं उवट्टिअभोअणं बम्हणजणं पेक्खिअ केण वि किल उम्मत्तवेसधारिणा बम्हणेण उच्चं हसिअ उत्तं - सेरं सेरं अण्हन्तु भवन्तो, अब्भुदअं खु इमस्स राअउलस्स भविस्सदि त्ति। तदो वअणसमआलं एव्व अदंसणं गदो। (आर्य! आश्चर्यं निर्वृत्तम्। भर्तुः शान्तिनिमित्तमुपस्थितभोजनं ब्राह्मणजनं प्रेक्ष्य केनापि किलोन्मत्तवेषधारिणाब्राह्मणेनोच्चं हसित्वोक्तं - स्वैरं स्वैरमश्नन्तु भवन्तः, अभ्युदयः खल्वस्य राजकुलस्य भविष्यतीति। ततो वचनसमकालमेवादर्शनं गतः।)

यौगन्धरायणः - अपि सत्यम्।

(ततः प्रविशति ब्राह्मणः)

ब्राह्मणः - इमेऽत्रभवता परिगृहीता आत्मप्रयोजनोत्सृष्टाः परिच्छद विशेषाः। एभिः प्रच्छादितशरीरो भगवान् द्वैपायनः प्राप्तः।

यौगन्धरायणः -	एवं, द्वैपायनः प्राप्तः।

ब्राह्मणः -	बाढम्।

यौगन्धरायणः -	तेन हि पश्यामस्तावत्।

ब्राह्मणः -	पश्यतु भवान्।

यौगन्धरायणः -कथमन्यद् रुपमिव मे संवृत्तम्। हन्त भोः! गतोऽस्मि स्वामिसन्निकर्षमेव। इदानीं ममोपदेशार्थमिवोत्सृष्टः।

उन्मत्तसदृशो वेषो धारितस्तेन साधुना।
मोचयिष्यति राजानं मां च प्रच्छादयिष्यति।। १७ ।।

(प्रविश्य)

प्रतीहारीः -	अय्य! भट्टिमादा आह - इच्छामि पुत्तअं पेक्खिदुं ति। (आर्य! भर्तृमाताह - इच्छामि मे पुत्रकं प्रेक्षितुमिति।)

यौगन्धरायणः -	अयमयमागच्छामि। आर्य! शान्तिगृहे मां प्रतीक्षस्व।

ब्राह्मणः -	बाढम्। (निष्क्रान्तः।)

यौगन्धरायणः -	हंसक! विश्रम्यतामिदानीम्।

हंसकः -	अय्य! तह। (निष्क्रान्तः।) आर्य! तथा)

यौगन्धरायणः -	विजये! गच्छाग्रतः।

प्रतीहारीः -	अय्य तह। (आर्य! तथा।)

यौगन्धरायणः -	भोः!

काष्ठादग्निर्जायते मथ्यमानाद्
भूमिस्तोयं खन्यमाना ददाति।
सोत्साहानां नास्त्यसाध्यं नराणां
मार्गारब्धाः सर्वयत्नाः फलन्ति।।

(निष्क्रान्ताः।)

इति प्रथमोऽङ्कः।

(ततः प्रविशति काञ्चुकीयः।)

अथ द्वितीयोऽङ्क

काञ्चुकीयः -	आभीरक! आभीरक गच्छ महासेनवचनात् प्रतीहाररक्षकं ब्रूहि - एष काशिराजोपाध्याय आर्यजैवन्तिरद्य दौत्येन प्राप्तः। अस्य सामान्यदूतसत्कारं पृष्ठतः कृत्वा सुखमिव निवेश्यताम्। यथा चातिथिसत्कारं जानीयात् तथा प्रयतितव्यम् इति। भो! एवं नामाहन्यहनि गोत्रानुकूलेभ्यो राजकुलेभ्यः कन्याप्रदानं प्रति दूतसम्प्रेषणा वर्तते। न खलु महासेनः कञ्चिदपि प्रत्याचष्टे, न चाप्यनुगृहीते। किन्नु खल्विदम् । अथवा दैवमत्र कन्याप्रदानेऽधिकृतम्। कुतः,

व्यक्तं न तावत् समुपैति तस्य
दूतो वधूत्वे विहिता हि यस्य।
ततो नरेन्द्रेषु गुणान् नरेन्द्रो
न वेत्ति जानन्नपि पत्प्रतीक्षः।। १ ।।

अये संलीयमानान्तःपुरचरः सनाथीभवत्ययं देशः। अये अयं महासेनः य एषः,

दूर्वाङकुरस्तिमितनीलमणिप्ररोहैः
पीताङगदैः परिगतैः परिणीवितांसः।

अस्माद् घनात् कनकतालवनैकदेशा-
न्निर्धावितः शरवणादिव कार्त्तिकेयः।। २ ।।

(निष्क्रान्तः।)

इति विष्कम्भकः

(ततः प्रविशति राजा सपरिवारः)

मम हयखुरभिन्नं मार्गरेणुं नरेन्द्रा
मुकुटतटविलग्नं भृत्यभूतां वहन्ति।
न च मम परितोषो यन्न मां वत्सराजः
प्रणमति गुणशाली कुञ्जरज्ञानदृप्तः।। ३ ।।

बादरायण!

(प्रविश्य)

काञ्चुकीयः - जयतु महासेनः।

राजा - निवेशितो जैवन्तिः।

काञ्चुकीयः - निवेशितोऽनुरूपतश्च सत्कृतः।

राजा - न्याय्यं कृतं राजवंश्यगुणाभिलाषिणा। समागतानां युक्तः पूजया प्रतिग्रहः। अथ सर्वोऽपि कन्याप्रदानं प्रति पृष्टश्चेत् परच्छन्देन तिष्ठति। (काञ्चुकीयमवलोक्य) बादरायण! वक्तुकाममिव त्वां लक्षये।

काञ्चुकीयः - न खलु किञ्चित्। कन्याप्रदानं प्रति समुत्पन्नोऽभिमर्शः।

राजा - अलमलं परिहृत्य। सर्वसाधारणो ह्येष विधिः। अभिधीयताम्।

काञ्चुकीयः - महासेन! एषा मे विवक्षा- एवं नामाहन्यहनि गोत्रनुकूलेभ्यो राजकुलेभ्यः कन्याप्रदानं प्रति दूतसम्प्रेक्षणा वर्तते। न च महासेनः कश्चिदपि प्रत्याचष्टे, न चाप्यनुगृहीते। किन्तु खल्विदमिति।

राजा - बादरायण! एवमेतत्। अतिलोभाद् वरगुणानामतिस्नेहाच्च वासवदत्तायां न शक्नोमि निश्चयं गन्तुम्।

कुलं तावच्छ्लाध्यं प्रथममभिकाङ्क्षे हि मनसा
तत सानुक्रोशं मृदुरपि गुणो ह्येष बलवान्।
ततो रूपे कान्तिं न खलु गुणतः स्त्रीजनभयात्
ततो वीर्योदग्रं न हि न परिपाल्या युवतयः ।। ४ ।।

काञ्चुकीयः - महासेनं वर्जयित्वा न हीदानीमेते गुणाः क्वचिदेकस्था दृश्यन्ते।

राजा - अतः खलु चिन्त्यते।

कन्यायाः वरसम्पत्तिः पितुः प्रायः प्रयत्नतः।
भाग्येषु शेषमायत्तं दृष्टपूर्वं न चान्यथा।। ५

दुहितुः प्रदानकाले दुःखशीला हि मातरः। तस्माद् देवी तावदाहूयताम्।

काञ्चुकीयः - यदाज्ञापयति महासेनः। (निष्क्रान्तः)

राजा - भोः! काशिराजदूतसम्प्रेक्षणेन वत्सराजग्रहणार्थं गतं शालङ्कायनं प्रति गता मे बुद्धिः। किन्तु खल्वद्यापि वृत्तान्तं न प्रेयषति स ब्राह्मणः।

कामं या तस्य सा लीला तत्रैवानुगतं मनः।

ये त्वस्य सचिवाः सर्वे यत्नमास्थाय ते स्थिताः।। ६

(ततः प्रविशति देवी असपरिवारा।)

देवी - जेदु महासेनो । (जयतु महासेणो।)

राजा - आस्यताम्।

देवी - जं महासेणो आणवेदि। (उपविशति।) यन्महासेन आज्ञापयति)

राजा - वासवदत्ता क्व।

देवी - उत्तराए वेदालिआए सआसे वीणं सिक्खिदुं णारदोअं गआ आसी। (उत्तराया वैतालिक्याः सकाशे वीणां शिक्षितुं नारदीयां गतासीत्।)

राजा - कथमुत्पन्नोऽस्या गान्धर्वेऽभिलाषः।

देवी - केण वि किल उग्धादेण कञ्चणमालं वीणाजोग्गं करअन्तिं पेक्खिअ सिक्खिदुकामा आसी। (केनापि किलोद्घातेन काञ्चनमालां वीणायोग्यां कुर्वतीं प्रेक्ष्य शिक्षितुकामासीत् ।)

राजा - सदृशं बाल्यस्य।

देवी - महासेणं वि किं वि विण्णविदुकामा म्हि। (महासेनमपि किमपि विज्ञापयितुकामास्मि।)

राजा - किमति।

देवी - आअय्यं इच्छामि त्ति। (आचार्यमिच्छामीति।)

राजा - उपस्थितविवाहकालायाः किमिदानीमाचार्येण। पतिरेवैनां शिक्षयिष्यति।

देवी - हं एसो दाणि मे दारिआए कालो । (हम् एष इदानीं मे दारिकायाः कालः।)

राजा - भोः! नित्यं प्रदीयतामित्यस्मानुपरुध्य किमिदानीं सन्तप्यसे।

देवी - अभिप्पेदं मे पदाणं। विओओ मं सन्तावेदि। अह कस्स उण, दिण्णा। (अभिप्रेतं मे प्रदानम्। वियोगो मां सन्तापयति। अथ कस्मै पुनर्दत्ता।)

राजा - न तावन्निश्चयोः गम्यते।

देवी - इदाणिं पि ण दाव। (इदानीमपि न तावत्)

राजा - अदत्तेत्यागता लज्जा दत्तेति व्यथितं मनः ।
धर्मस्नेहान्तरे न्यस्ता दुःखिताः खलु मातरः ।।

सर्वथा श्वसुरपरिचरणसमर्थे वयसि वर्तते वासवदत्ता। एष चापरः कासिराजोपाध्याय आर्यजैवन्तिरद्य दौत्येन प्राप्तो विलोभयति मां चारित्रेण। (आत्मगतम्) न किञ्चिदाह। अश्रुपूर्वा व्याकुला कथं निश्चयं गमिष्यति। भवतु, निवेदयाम्यस्यै। (प्रकाशम्) श्रूयन्तेऽस्मत्सम्बन्धप्रयोजनायागता राजानः।

देवी - किं दाणि वित्थरेण। जहिं दइअ ण सन्तप्पामो, तहिं दीअदु।

(किमिदानीं विसतरेण । यत्र दत्त्वा न सन्तप्यामहे, तत्र दीयतां।)

राजा - श्रूयता अहो महान् खलु लीलाभिहितो दुःखविस्तर इदानीं पश्चादुपालम्भनं श्रोतुम्। तस्माद् देवी तावन्निश्चयं गच्छतु। श्रूयताम्,

अस्मत्सम्बद्धो मागधः काशिराजो वाङ्गः सौराष्ट्रो मेथिलः शूरंसनः।

एते नानार्थैर्लोभयन्ते गुणैर्मां कस्ते वैतेषां पात्रतां याति राजा।।

(प्रविश्य)

काञ्चुकीयः - वत्सराजः ।

राजा - किं वत्सराजः ।

काञ्चुकीयः - प्रसीदतु प्रसीदतु महासेनः। प्रियवचननिवेदनत्वरया क्रमविशेषो नावेक्षितः ।

राजा - प्रियवचनमिति ।

देवी - (उत्थाय) जेदु महासेणो। (जयतु महासेनः ।)

राजा - (सहर्षम्) प्रियवचनपरिहार्या हि देवी । आस्यताम् ।

देवी - जं महासेणो आणवेदी । (उपविशति ।) (यद् महासेन आज्ञापयति ।)

राजा - उत्तिष्ठोत्तिष्ठ, स्वरमभिधीयताम् ।

काञ्चुकीयः - (उत्थाय) तत्रभवतामात्येन शालङ्कायनेन गृहीतो वत्सराजः ।

राजा - (सहर्षम्) किमाह भवान् ।

काञ्चुकीयः - तत्रभवतामात्येन शालङ्कायनेन गृहीतो वत्सराजः ।

राजा - उदयनः ।

काञ्चुकीयः - अथ किम् ।

राजा - शतानीकस्य पुत्रः ।

काञ्चुकीयः - दृढम् ।

राजा - सहस्रानीकस्य नप्ता।

काञ्चुकीयः - स एव।

राजा - कौशाम्बीशः।

काञ्चुकीयः - सुव्यक्तम्।

राजा - गान्धर्ववित्तकः।

काञ्चुकीयः - एवं ब्रुवन्ति।

राजा - वत्सराजो ननु।

काञ्चुकीयः - अथ किं, वत्सराजः ।

राजा - अथ किमुपरतो यौगन्धरायणः ।

काञ्चुकीयः - न खलु कौशम्ब्यां किल ।

राजा - यद्येवं, नगृहीतो वत्सराजः ।

काञ्चुकीयः - श्रद्धत्तां महासेनः ।

राजा - न श्रद्दधाम्युदयनग्रहणं त्वयोक्तं व्यावर्तनं करतलैरिव मन्दरस्य। ९
यस्याहवेषु रिपवः कथयन्ति शौर्यं यौगन्धरायणमतानि च नः स्वनन्ति ।।

काञ्चुकीयः - प्रसीदतु महासेनः । वृद्धोऽस्मि ब्राह्मणः खल्वहम्। न महासेनसमीपेऽनृतमभिहितपूर्वम्।

राजा - आ अस्त्येतत् । अथ कः प्रियदूतः शालङ्कायनेन प्रेषितः।

काञ्चुकीयः - न पुरुषः । जवातिशययुक्तेन खररथेन वत्सराजमग्रतः कृत्वा स्वयमेवामात्यः प्राप्तः ।

राजा - एवं प्राप्तः । हन्त भोः! अद्य विमुक्तसन्नाहा सुखं विश्राम्यत्वक्षौहिणी। अद्यप्रभुति प्रच्छन्नकृतदूतसम्प्रेषणा अशङ्किताः स्थास्यन्ति राजानः । एष समासः- अद्यास्मि महासेनः।

देवी - किं अमच्चेण आणीदो । (किममात्येनानीतः)

राजा - अथ किम्।

देवी - एदण्णिमित्तं कस्स वि ण दिच्छामो वासवदत्तं। (एतन्निमित्तं कस्मा अपि न दित्सामो वासवदत्ताम्।)

राजा - युद्धावजितशत्रुः खल्वेष मम। बादरायण! शालङ्कायनः क्व।

काञ्चुकीयः - आहितो भद्रद्वारे।

राजा - गच्छ । भरतरोहतकं ब्रूहि- कुमारविधिविशिष्टेन सत्कारेण वत्सराजमग्रतः कृत्वा प्रवेश्यताममात्य इति।

काञ्चुकीयः - यदाज्ञापयति महासेनः।

राजा - एहि तावत्।

काञ्चुकीयः - अयमस्मि।

राजा - वत्सराजदर्शने कश्चिन्नोत्सारयितव्यः।

शत्रुं पश्यन्तु मे पौराः श्रुतपूर्वं स्वकर्मभिः।
सिंहमन्तर्गतामर्षं यज्ञार्थमिव संयतम्।। १०

काञ्चुकीयः - यदाज्ञापयति महासेनः (निष्क्रान्तः)

देवी - बहूणि अब्भुदआणि इमस्मि राअउले अणुभूदाणि। ण खु अहं ईदिसं पीदिजोग्गं महासेणस्स सुमरामि। (बहवोऽभ्युदया अस्मिन् राजकुलेऽनुसूताः। न खल्वहमीदृशं प्रीतियोग्यं महासेनस्य स्मरामि।)

राजा - अहमप्येतादृशं प्रीतिविशेषं न श्रुतपूर्वं स्मराभि, यथा गृहीतो वत्सराज इति।

देवी - बच्छराओ णं । (वत्सराजो ननु ।)

राजा - अथ किम्।

देवी - बहूणि सम्बन्धप्पओअणागदाणि राअउलाणि सुदाणि। एदिणा ण पेसिदपुरुषो पुरुसो। (बहूनि सम्बन्धप्रयोजनागतानि राजकुलानि श्रुतानि । एतेन न प्रेषितपूर्वः पुरुषः ।)

राजा - देवी! महासेनशब्दमपि न गणयति, किं सम्बन्धमभिलषति।

देवी - ण गणेदि। कि बालो अपण्डिदो वा। (नगणयति । किं बालः अपण्डितो वा)

राजा - बालः न त्वपण्डितः।

देवी - किण्णु हु एणं उस्सेअअदि। (किन्तु खल्वेनसुत्सेकयति।)

राजा - उत्सेकयत्येनं प्रकाशराजर्षिनामधेयो वेदाक्षरसमवायप्रविष्टो भारतो वंशः । दर्पयत्येनं दायाद्यागतो गान्धर्वो वेदः। विभ्रमयत्येनं वयस्सहजं रूपम् । विस्रभ्ययत्येनं कथमप्युत्पन्नोऽस्य पौरानुरागः।

देवी - अभिळसणीआ वरगुणा। कस्स वामदाए दोसो संवुत्तो। (अभिलषणीया वरगुणाः कस्य वामतया दोषः संवृत्तः।)

राजा - देवि! किमिदानीमस्थाने विस्मितासि। पश्य,

अग्निः कक्ष इवोत्सृष्टो दहत् कात्सर्न्येन मेदिनीम् ।
अस्य मे शासनं दीप्तं विषयान्तेऽवसीदति।। ११ ।।

(प्रविश्य)

काञ्चुकीयः - जयतु महासेनः। यथाज्ञाप्रयुक्तसत्कारं प्रविष्टः शालङ्कायनः। स तु विज्ञापयति- इदं भरतकुलोपभुक्तं वत्सराजकुले द्रष्टव्यं घोषवती नाम वीणारत्नम्। महासेनः प्रतिग्राहयितव्य इति। (वीणांदर्शयति।)

राजा - प्रतिगृहीतं जयमङ्गलम्। (वीणां गृहीत्वा) इयं सा घोषवती नाम। यैषा,

श्रुतिसुखमधुरा स्वभावरक्ता
करजमुखोल्लिखिताग्रघृष्टतन्त्री।
ऋषिवचनगतेव मन्त्रविद्या
गजहृदयानि बलाद्वशीकरोति।। १२ ।।

भोः! समरावजितानां रत्नानामिष्टसम्भोगः प्रीतिमुत्पादयति।

अर्थशास्त्रगुणग्राहि ज्येष्ठो गोपालकः सुतः।
गान्धर्वद्वेषी व्यायामशाली चाप्यनुपालकः।। १३ ।।

क्व नु खल्वियं सुन्यस्ता भवेत्। देवि! वासवदत्ता वीणामुपक्रान्ता ननु।

देवी - आम।

राजा - तेन हि इयमस्यै प्रदीयताम्।

देवी - वीणाप्पदाणेण भूओ वि उम्मत्ता विअ चिट्ठदि। (वीणाप्रदानेन भूयोऽप्युन्मतेव तिष्ठति।)

राजा - क्रीडतु क्रीडतु। नेतत् श्वशुरकुले। बादरायण! क्व सा।

काञ्चुकीयः - अमात्येन सहोपविष्टा।

राजा - अथ वत्सेष्वधिकृतः।

काञ्चुकीयः - अहितविनयत्वात् पादयोरङ्गे तस्य बहुप्रहारत्वाच्च रुकन्धवाह्येन शयनीयेन मध्यमगृहे प्रवेशितः।

राजा - हा धिग, बहुप्रहारः। एष इदानीं निरुपस्कृतस्य तेजसो दोषः। नृशंसः खल्वस्मिन् काल उपेक्षितवान्। बादरायण! गच्छ। भरतरोहकं ब्रूहि- क्रियतामस्य व्रणप्रतिकर्मेति।

काञ्चुकीयः - यदाज्ञापयति महासेनः।

राजा - अथवा एहि तावत्।

काञ्चुकीयः - अयमस्मि।

राजा - अस्य सर्वदर्शनमविमुक्तसत्कारमवगन्तव्यम्। आकारसूचिता अस्य प्रीतयो विज्ञेयाः। अतिक्रान्तविग्रहाश्रिताः कथा न कथयितव्याः। क्षुतादिप्रयोगेष्वाशिषोऽभिधेयाः। कालसंवादिनास्तवे नार्च्यः।

काञ्चुकीयः - यदाज्ञापयति महासेनः। (निष्क्रम्य प्रविश्य) जयतु महासेनः। पथ्येव कृतव्रणप्रतिकर्मा वत्सराजः। अकालस्तावदिदानीं द्वितीयस्य प्रतिकर्मण इति। मद्याह्ममारोहति दिवाकरः।

राजा - अथ कस्मिन् प्रदेशे वीरमानी।

काञ्चुकीयः - मयूरयष्टिमुखे।

राजा - हा धिग्, अनाश्रयणीयः खल्वयं देशः। आतपप्रातिकूल्यार्थं मणिभूमिकायां प्रवेशयेत्याज्ञापय।

काञ्चुकीयः - यदाज्ञापयति महासेनः। (निष्क्रम्य प्रविश्य) यदाज्ञप्तं महासेनेन, सर्वमनुष्ठितम्। अमात्यस्तु भरतरोहको महासेनं द्रष्टुमिच्छति।

राजा - व्यक्तं न रोचते तस्मै वत्सराजसत्क्रिया। अस्यैष नीतेः परिश्रमः। अहमेवैनमनुनयामि।

देवी - किं सम्बन्धो णिच्चिदो। (कि सम्बन्धो निश्चितः।)

राजा - न तावन्निश्चयो गम्यते।

देवी - अळं दाणि तुवरिअ। बाळा मे दारिआ। (अलमिदानीं त्वरित्वा। बाला मे दारिका।)

राजा - यदभिरुचितं भवत्यै। प्रविशत्वभ्यन्तरम्।

देवी - जं महासेणो आणवेदि। (निष्क्रान्ता सपरिवारा।) (यन्महासेन आज्ञापयति।)

राजा - (विचिन्त्य)

पूर्वं तावद् वैरमस्यावलेपा
दानीतेस्मिन् स्यात् तु मध्यस्थता मे
युद्धक्लिष्टं संशयस्थं विपन्नं
श्रुत्वा त्वेनं संशयं चिन्तयामि।। १४ ।।

(निष्क्रान्तौ।)

द्वितीयोऽङ्कः।

अथ तृतीयोऽङ्कः।

(ततः प्रविशति डिण्डिकवेषो विदूषकः।)

विदूषकः - (निरूप्य) भो! देवउळपीठिआए मम मोदअमळ्ळअं णिक्खिविअ दक्खिणामासआणि गणिअ बन्धिअ पडिणिवुत्तो दाणि मोद अमळ्ळअं ण पेककामि। (विचिन्त्य) आ एकमोदअपरितोसिदो ण दाव ओळग्गो मं अणुसरदि। उच्चदाए पाआरस्स अगई कुक्कुराणं। अक्खदभत्तदाए अळोहणीअं पहिआणं। आदु अपि णं खाआमि। भोदु ओग्गारइस्सं दाव अहं। ही ही बुड्डो विअ सअरवत्थी सुद्धवादं एव्व उग्गिरामि। अहव ळाहिदकच्चाअणीए केरअं मम केरअं त्ति करिअ सिवेण पडिहत्थीकिदं भवे। (निरूप्य) जदि वि एसो बम्हआरी बहुकेहि रूवेहि अविणअं करेदि। भोदु पेक्खिस्सं दाव अहं । भो! एदं खु मम मोदअमळ्ळअं सिवस्स पादमूळे चिट्ठइ। जाव णं गह्णामि। देहि भट्टा! देहि मे मोदअमळ्ळअं। भट्टा! तुवं वि मम चोरो सि। अविहा अळिहिदं खुमम मोदअममळ्ळअं संदावतिमिरेण सुट्ठुण पेक्खामि। भोदु पमज्जिस्सं दाव अहं। ही ही साहु ळे चित्तअर! भाव! साहु। जुत्तळेहदाए वण्णाणं जह जह पमज्जामि, तह तह उज्जळदरं होइ भोदु, उदएण पमज्जिस्सं। कहिं णु हु उदअं। इदं सोहणं सुद्धतडाअं। अहं विअ सिवो वि दाव एदस्सिं मोदअमळ्ळए णिरासो होदु। (भोः! देवकुलपीठिकायां मम मोदकमल्लकं निक्षिप्य दक्षिणामाषकान् गणयित्वा बद्ध्वा प्रतिनिवृत्त इदानीं मोदकमल्लकं न प्रेक्षे। आ एकमोदकपरितोषितो न तावदवलग्नो मामनुसरति। उच्चतया प्राकारस्यागतिः कुक्कुराणाम्। अक्षतभक्ततयालोभनीयं पथिकानाम्। अथवा अप्येनं खादामि। भवतु उद्गरिष्यामि तावदहम् ही ही वृद्ध इव सूकरबस्तिः शुद्धवातमेवोद्गिरामि। अथवा लोहितकात्यायन्याः सम्बन्धि मम सम्बन्धीति कृत्वा शिवेन प्रतिहस्तीकृतं भवेत्। यद्यप्येष ब्रह्मचारी बहुकै रूपैरविनयं करोति। भवतु प्रेक्षिष्ये तावदहम्। भोः! एष खलु मम मोदकमल्लकः शिवस्य पादमूले तिष्ठति। यावद् एनं गृहणामि। देहि भर्तः! देहि मे मोदकमल्लकमम्। भर्तः! त्वमपि मम चोरोऽसि। अविधा आलिखितं खलु मम मोदकमल्लकं सन्तापतिमिरेण सुष्ठु न प्रेक्षे। भवतु प्रमार्जिष्यामि तावदहम्। ही ही साधु रे चित्रकर! भाव! साधु। युक्तलेखतया वर्णानां यथा यथा प्रमार्ज्मि, तथा तथोज्जवलतरं भवति। भवतु, उदकेन प्रमार्जिष्यामि। कुत्र नु खलूदकम्। इदं शोभनं शुद्धतटाकम्। अहमिव शिवोऽपि तावद् एतस्मिन् मोदक-मल्लके निराशो भवतु।)

(नेपथ्ये)

मोदआ! मोदआ! हहह। (मोदकाः! मोदकाः! हहह।)

विदूषकः - अविहा एसो उम्मत्तओ मम मोदअमळ्ळअं गह्णिअ हसमाणो फेणायमाणमळिणवरिसारच्छोदअं विअ इदो एव्वाहावइ। चिच्ठ चिट्ठ उम्मत्तअ! चिट्ठ। इमिणा दण्डअट्ठेण सीसं दे भिन्दामि। (अविधा एष उन्मत्तको मम मोदकमल्लकं गृहीत्वा हसमानः फेनायमानमत्निनवर्षारथ्योदकमिवेत एवाधावति। तिष्ठ तिष्ठोन्मत्तक! तिष्ठ। अनेन दण्डकाष्ठेन शीर्षं ते भिनझ्मि।)

(ततः प्रविशत्युन्मत्तकः।)

उन्मत्तकः - मोदआ! मोदआ! हहह। (मोदकाः! मोदका! हहह।)

विदूषकः - भो उम्मत्तअ! आणेहि मम मोदअमळ्ळअं। (भो उन्मत्तक! आनय मम मोदकमल्लकम्।)

उन्मत्तकः - किं मोदआ। कहिं मोदआ। कश्य मोदआ। किं इमे मोदआ उज्झन्ति, आदु पिणज्झन्ति, उदाहो खज्जन्ति। (किं मोदकाः। कुत्र मोदकाः। कस्य मोदकाः। किमिमे मोदका उज्झ्यन्ते, अथवा पिनह्यन्ते उताहो खाद्यन्ते।)

विदूषकः - ण खज्जन्ति ण खज्जन्ति ण उज्झन्ति अ। (न खाद्यन्ते न खाद्यन्ते नोज्झ्यन्ते च।)

उन्मत्तकः - एसा खु मम रसणा खाइदुकामा ळिङ्गाणि करेदि। (एषा खलु मम रसना खादितुकामा लिङ्गानि करोति।)

विदूषकः - भो उम्मत्तअ। आणेहि मम मोदअमळ्ळअं । मा परकेरए सिणेहं करिअ ओवज्झेहि। (भो उन्मत्तक! आनय मम मोदकमल्लकम्। मा परकीये स्नेहं कृत्वा अवबध्यस्व।)

उन्मत्तकः - के के मं वज्झन्ति। मोदआ खु मं रक्खन्ति।
णेवच्छविसेसमण्डिदा पीदिं उवदेदुं उवट्ठिआ।
ळाअगिहहे दिण्णमुळिआ काळवसेण मुहुत्तदुब्बळा ।। १ ।।

(के के मां बध्नन्ति। मोदकाः खलु मां रक्षन्ति।

नेपथ्यविशेषमण्डिताः प्रीतिमुपदातुमुपस्थिताः।
राजगृहे दत्तमूल्या कालवशेन मुहूर्तदुर्बलाः।।)

विदूषकः - भो उम्मत्तअ! आणेहि मम मोदअमळ्ळअं। इमिणा। पच्चएण उवज्झाअउळं गन्तव्वं। (भो उन्मत्तक! आनय मम मोदकमल्लकम्। अनेन प्रत्ययेनोपाध्यायकुलं गन्तव्यम्।)

उन्मत्तकः - मए वि इमिणा पच्चएण जोअणसदं गन्तव्वं। (मयाप्यनेन प्रत्ययेन योजनशतं गन्तव्यम्।)

विदूषकः - किं एळावणे तुवं। (किमैरावणस्त्वम्।)

उन्मत्तकः - आम एळावणे अहं। ण हु दाव देवळाजो मं आशणं आळुहदि। शुदं च मया पादपाशिएहि इन्दे वज्झ त्ति। धाराणिअळेहि विज्जुम्मइहहि कशाहि ताळिअ वाउब्भामेण परिब्भमन्तेण भिन्दीअदि मेहबन्धणं। (आम एरावणोऽहम्। न खलु तावद् देवराजो मामासनमारोहति। श्रुतं च मया पादपाशिकैरिन्द्रो बद्ध इति। धारानिगलैः विद्युन्मयीभिः कशाभिस्ताडयित्वा वातोद्भ्रामेण परिभ्रमता भिद्यते मघबन्धनम्।)

विदूषकः - भो उम्मत्तअ! ण तुवं मम दइस्शिसि, विळविस्सं दाव अहं। (भो उनमत्तक! न त्वं मम दास्यसि, विलापिष्यामि तावदहम्।)

उन्मत्तकः - विळव विळव विक्कोस वा विळव। (विलप विलप विक्रोश वा विलप।)

विदूषकछ - अब्बम्मणं भो! अब्बम्मणं। (अब्रह्मण्यं भोः! अब्रह्मण्यम्।)

उन्मत्तकः - अहं पि विळविस्सं । इन्दे वज्झे भो। इन्दे वज्झे भो!। (अहमपि विलपिष्यामि। इन्द्रो बद्धो भोः! ।)

विदूषकः - अब्बम्मणं भो! अब्बम्मणं। (अब्रह्मण्यं भोः! अब्रह्मण्यम्।)

(नेपथ्ये)

मा भाआहि मा भाआहि बम्हणाउस। मा भाआहि। (मा बिभीहि मा बिभीहि ब्राह्मणोपासक! मा बिभीहि।)

विदूषकः - (सहर्षम्) आअदे चन्दे समाअदाणि सव्वणक्खत्ताणि। अघं बम्हणभावं। ईहामत्तएण समणएण अभअं दीअदि। (आगते चन्द्रे समागतानि सर्वनक्षत्राणि। अघं ब्राह्मणभावः। ईहामात्रकेण श्रमणकेनाभयं दीयते।)

(ततः प्रविशति श्रमणकः।)

श्रमणकः - मा भाआहि मा भाआहि बम्हणाउस! मा भाआहि। के के इह, किं कय्यं विळवन्दि। (मा बिभीहि मा बिभीहि ब्राह्मणोपासक! मा बिमीहि। के के इह, किं कार्यं, विलपन्ति।)

विदूषकः - अविहा पडिहहारक्खअउत्तिं खु समणओ अणुहोदि। भो समणअ! भअवं! एसो उम्मत्तओ मम मोदअमळ्ळअं गह्णिअ ण देदि (अविधा प्रतिहहाररक्षकवृत्तिं खलु श्रमणकोऽनुभवति। भोः श्रमणक! भगवन्! एष उन्मत्तको मम मोदकमल्लकं गृहीत्वा न ददाति।)

श्रमणकः - मोदअं पेक्खामि दाव। (मोदकं प्रेक्षे तावत्।)

उन्मत्तकः - पेक्खदु पेक्खदु शमणअ! भवं। (प्रेक्षतां प्रेक्षतां श्रमणक! भवान्!)

श्रमणकः - थु थु। (थु थु।)

विदूषकः - हद्धि उम्मत्तअस्स हत्थे ईहहामत्तएण समणएण थुथूकिदा अधण्णस्स मम मोदआ दिट्ठपुरुवा एव्व संवुत्ता। (हा धिग् उन्मत्तकस्य हस्ते ईहामात्रकेण श्रमणकेन थुथूकृता अधन्यस्य मम मोदका दृष्टपूर्वा एव संवृत्ताः।)

श्रमणः - भो उम्मत्तआउस! णीआदेहि णीआदेहि एदाणि मोदआणिकत्थूळिआफेणपण्डराणि बहुपिट्ठसमिद्धकोमळाणि णिट्ठणिआ सुरा विअ महुराणणइ। मा दे खाइदाणि खअं उप्पादन्ति। (भो उन्मत्तकोपासक! निर्यातय निर्यातय एतानि मोदकानि कस्थूलिकाफेनपाण्डराणि बहुपिष्टसमृद्धकोमलानि निष्ठानिताः सुरा इव मधुराणि। मा ते खादितानि क्षयमुत्पादयन्तु।)

विदूषकः - अविहा मोदआणि त्ति करिअ कण्डिळळङ्डुआ मे पडिच्छिदा। (अविधा मोदका इति कृत्वा कण्डिललड्डुका मे प्रतीष्ठाः।)

श्रमणकः - उम्मत्तआउस! णीआदेहि णीआदेहि। जदि ण णीआदेसि, तुवं सवेमि। (उन्मत्तकोपासक! निर्यातय निर्यातय। यदि न निर्यातयसि, त्वां शपामि।)

उन्मत्तकः - पशीददु पशीददु शमणअ! भअवं। मा खु मा खु मं शविदुं गह्ण गह्ण। (प्रसीदतु प्रसीदतु श्रमणक! भगवन्! माखलु माखलु मां शप्तुम्। गृहाण गृहाण।)

श्रमणकः - बम्हणाउस! पेक्ख पेक्ख मम प्पभावं। (बाह्मणोपासक! प्रेक्षस्व प्रेक्षस्व मम प्रभावमम्।)

विदूषकः - एसा उम्मत्तओ एदेण ईहामत्तएण उज्झिदं सावं पेक्खअ मोदअमळ्ळअं भीदभीदं अग्गङ्गुळिआए पसारिदाए ठाविअ चिट्ठइ। भो उम्मत्तअं! आणेहि मम मोदअमळ्ळअं। (एष उन्मत्तक एतेनेहामात्रकेण श्रमणकेन उज्झितं शापं प्रेक्ष्य मोदकमल्लकं भीतभीतमग्राङ्गुल्यां प्रसाहितायां स्थापयित्वा तिष्ठति। भो उन्मत्तक! आनय मम मोदकमल्लकम्।)

श्रमणकः - एदु एदु भवं। एदेहि मोदएहि मं सोत्थि वाअइस्ससि। (एतु एतु भवान्। एतैर्मोदकैर्मां स्वस्ति वाचयिष्यसि।)

विदूषकः - ही ही ममकेरएहिं सोत्थि वाएमि। मए वि कोडुम्बिअस्स हत्थादो पडिग्गहगहीदाणि। ताणि भवदो वि उवाअणं भविस्सदि। सो वि समिद्धो होदु। एसो उम्मत्तओ अग्गिगिहं अहिमुहो गच्छइ। ट्ठिदो मज्झह्णो। पुव्वहणे वि दाव अअं देसो सुञ्ञो भविस्सदि। जाव अहं वि इमाणि दक्खिणामासआणि मग्गगेहे णणिक्खिविअ गच्छामि। एकस्स शाडिआए कय्यं अवरस्स मुळ्ळेण। (ही ही मदीयैः स्वस्ति वाचयामि। मयापि कौटुम्बीकस्य हस्तात् प्रतिग्रहगृहीतानि। तानि भवतोऽप्युपायनं भविष्यति। सोऽपि समुद्धो भवतु। एष उन्मत्तकोऽग्निगृहमभिमुखो गच्छति। स्थितो मध्याह्नः। पूर्वाहणोऽपि तावदयं देशः शून्यो भविष्यति। यावदहमपीमान् दक्षिणामाषकान् मार्गगेहे निक्षिप्य गच्छामि। एकस्य शाटिकया कार्यमपरस्य मूल्येन।)

(सर्वे अग्निगृहं प्रविशन्ति।)

यौगन्धरायणः - वसन्तक! शून्यमिदमग्निगृहम्।

विदूषकः - आम भो! सुञ्ञं खु इदं। (आम भोः! शून्यं खल्विदम्।)

यौगन्धरायणः - तेन हि परिष्वजेतां भवन्तौ।

उभौ - बाढम्। (परिष्वजेते)

यौगन्धरायणः - भवतु भवतु। तुल्यपरिश्रमौ भवन्तौ। आस्तां भवान् भवानप्यास्ताम्।

उभौ - बाढम्।

यौगन्धरायणः - वसन्तक! अपि दृष्टस्त्वया स्वामी।

विदूषकः - आम भो! दिट्ठो तत्तभवं। (आम भोः!। दृष्टस्तत्रभवान्।)

यौगन्धरायणः - हन्त भोः अतिक्रान्तयोगक्षेमा रात्रिः। दिवस इदानीं प्रतिपाल्यते।

अहः समुत्तीर्य निशा प्रतीक्ष्यते
शुभे प्रभाते दिवसोऽनुचिन्त्यते।
अनागतार्थान्यशुभानि पश्यतां
गतं गतं कालमवेक्ष्य निर्वृतिः ।। २ ।।

रुमण्वान् - सम्यग् भवानाह। तुल्येऽपि कालविशेषे निशैव बहुदोषा बन्धनेषु। कुतः,

व्यवहारेष्वसाध्यानां लोके वा प्रतिरज्यताम् ।
प्रभाते दष्टदोषाणां वैरिणां रजनी भयम् ।। ३ ।।

यौगन्धरायणः - वसन्तक! स्वामिना सह कथितं ननु।

विदूषकः - आम भो! चिरं एव्व अ म्हि तत्तहोदा ओवज्झो। अज्ज चउद्दसीं ण्हाअमाणो पडिवाळिदो अ। (आम भोः! चिरमेव चास्मि तत्रभवतावबद्धः। अद्य चतुर्दशीं स्नायमानः प्रतिपालितश्च।)

यौगन्धरायणः - स्नातः स्वामी।

विदूषकः - ण्हादो अत्तभवं। (स्नातोऽत्रभवान्।)

यौगन्धरायणः - कृतं देवकार्यम्।

विदूषकः - आ भो! पणाममत्तेण पूइदा देवदा। (आम भोः! प्रणाममात्रेण पूजिता देवताः।)

यौगन्धरायणः - एतामपि बहुमतामवस्थां प्राप्तः स्वामी। कुतः,

स्नातस्य यस्य समुपस्थितदैवतस्य
पुण्याहघोषविरमे पटहा नदन्ति।
तस्यैव कालविभवात् तिथिपूजनेषु
दैवप्रणामचलिता निगलाः स्वनन्ति।। ४ ।।

रुमण्वान् - भवत इदानीं प्रयल उचितं तिथिसत्कारमानेष्यति स्वामिनः।

यौगन्धरायणः - वसन्तक! गच्छ भूयः स्वामिनं पश्य। विज्ञाप्यतां च स्वामी- या सा प्रयाणं प्रतीह प्रस्तुता कथा, तस्याः श्वः प्रयोगकाल इति। कुतः, स्थानावगाहयवसशय्याभागेष्वाश्रयेषुपन्यस्तौषधिव्याजो नलागिरिर्मन्त्रौषधिनियमसम्भृतः पुराणकर्मव्यामोहितः। अनुकूलमारुतमोक्तव्यः सज्जितो धूपः। रोषप्रतिकूलोऽस्य सज्जितः प्रतिगजमदः। शालासन्निकृष्टमल्पसाधनं गृहमादीपयितुमग्नित्रासित्वाद् वारणानाम्। गजपतिचित्तोद्भ्रमणार्थं देवकुलेषु स्थापिताः शङ्खदुन्दुभयः। तेन नादेन सर्वसाधनपरिगतशरीरेणावश्यं श्वः प्रद्योतेन स्वामी शरणमुपगन्तव्यः। ततः स्वामिना शत्रोरनुमतेनैव बन्धनान्निष्क्रम्य सहव्यापन्नां घोषवतीं हस्तगतां कृत्वा नलगिरिः स्वाधीनः कर्तव्यः। ततो व्यवस्थितासनस्तदानीं स्वामी नलागिरौ,

सेनाभिर्मनसानुबद्धजघनं कृत्वा जवे वारणं
सिंहानामसमाप्त एव विरुते त्यक्त्वा सविन्ध्यं वनम्।

एकाहे व्यसने वने स्वनगरे गत्वा त्रिवर्णां दशां
येनैव द्विरदच्छलेन नियतस्तेनैव निर्वाह्यते ।। ४ ।।

इति !

रूमण्वान् - वसन्तक! किमिदानीं चिन्त्यते।

विदूषकः - एव्वं चिन्तेमि महन्तो खु भवदो पयत्तो विवज्जिस्सिदि त्ति। (एवं चिन्तयामि महान् खलु भवतः प्रयत्नो विपत्स्यत इति।)

उभौ - न खलु वयं विज्ञातारः।

विदूषकः - अहं पुढम पच्चा भवन्तो। (अहं प्रथमं पश्चाद् भवन्तौ।)

यौगन्धरायणः - अथ किंकृता कार्यविपत्तिः।

विदूषकः - वच्छराअस्स अण्णकय्यदाए। (वत्सराजस्यान्यकार्यतया।)

यौगन्धरायणः - कथमिव।

विदूषकः - सुणह भवन्तो। (शृणुतां भवन्तौ)

उभौ - अवहितौ स्वः।

विदूषकः - जा सा काळट्ठमी अदिक्कन्दा, तर्हिं तत्तहोदी वासवदत्ता णाम राअदारिआ धत्तीदुदीआ कण्णआदंसणं णिद्दोसं त्ति करिअ अवणीदकञ्चुआए सिविआए ओघट्टिदपणाळीपस्सुदसळिळविसमं राअमग्गं परिहरिअ जं तं बन्धणदुवारस्स अग्गदो भअवदीए जक्खिणीए ट्ठाणं, तस्सिं देवकय्यं कत्तुं गआ आसी। (या सा कालाष्टमी अतिक्रान्ता, तस्यां तत्रभवती वासवदत्ता नाम राजदारिका धात्रीद्वितीया कन्यकादर्शनं निर्दोषमिति कृत्वापनीतकञ्चुकायां शिबिकायामवघट्टितप्रणालीप्रस्तुतसलिलविषमं राजमार्गं परिहृत्य यत्तद् बन्धनद्वारस्याग्रतो भगवत्या यक्षिण्याः स्थानं, तस्मिन् देवकार्यं कर्तुं गतासीत्।)

यौगन्धरायणः - ततस्ततः।

विदूषकः - तदो तत्तभवं तं दिअसं अब्भन्तरबन्धणमपरिरक्खअं सिवअं णाम राअदासं अणुमाणिअ बन्धणदुवारे णिक्कन्तो। (ततस्तत्रभवान् तं दिवसमभ्यन्तरबन्धनपरिरक्षकं शिवकं नाम राजदासमनुमान्य बन्धनद्वारे निष्क्रान्तः।)

उभौ - ततस्ततः।

विदूषकः - तदो पुरुसक्खन्धपरिवट्टणट्टिदाए सिविआए पकामं दिट्ठा सा राअदारिआ। (ततः पुरुषस्कन्धपरिवर्तनस्थितायां शिबिकायां प्रकामं दृष्टा सा राजदारिका।)

यौगन्धरायणः - ततस्ततः ।

विदूषकः - किं तदो तदो त्ति। बन्धणं दाणिं पमदवणं सम्भाविअ पउत्तो राअळीळं कत्तुं। (किं ततस्तत इति। बन्धनमिदानीं प्रमदवनं सम्भाव्य प्रवृत्तो रागलीलां कर्तुम्।)

यौगन्धरायणः - न खलु तां प्रति समुत्पन्नाभिलाषः स्वामी।

विदूषकः - भो! सङ्घआरिणो अणत्थ त्ति ईदिसं एव्व। (भोः! सङ्घचारिणोऽनर्था इतीदृशमेव।)

यौगन्धरायणः - सखे! रुमण्वन्! स्थिरीक्रियतामात्मा। अनेनैव वेषेण जरा गन्तव्या।

विदूषकः - भो! अहं च एदेण उत्तो-भणेहि जोअन्धराअणस्सं जहसमत्थिदा समत्थणा ण रोअदे मे। समाणे गमणे पज्जोदस्स अवमाणविसेसो चिन्तीअदि। मा कामप्पधाण त्ति मं अवमण्णेहि। अवमाणस्स अवजिदिं अण्णेसामि त्ति। (भोः! अहं चैतेनोक्तः- भण यौगन्धरायणाय यथासमर्थिता समर्थना न रोचते मे। समाने गमने प्रद्योतस्यावमानविशेषश्चिन्त्यते। मा कामप्रधान इति मामवमन्यस्व। अवमानस्यापचितिमन्विष्यामीति।)

यौगन्धरायणः - अहो शत्रुजनापहास्यमभिधानम्। अहो निरपत्रपता खलु बुद्धेः। अहो सुहृज्जनसन्तापकारणम्। अदेशकाले ललितं कामयते स्वामी। कुतः,

शक्ता दर्पयितुं स्वहस्तरचिता भूमिः कटप्रच्छदा
पर्याप्तो निगलस्वनश्चरणयोः कन्दर्पमालम्बितुम्।
कः श्रुत्वा न भवेद्धि मन्मथपटुः प्रत्यक्षतो बन्धने
रक्षार्थं परिगण्यमानपुरुषे राजेति शब्दापनम्।। ६ ।।

विदूषकः - भो! दंसिदो सिणेहो। णिव्विट्ठं पुरूसआरं । साहु उज्झिअ णं गच्छामो। (भोः! दर्शितः स्नेहः। निर्विष्टः पुरुषकारः। साधूज्झित्वैनं गच्छामः।)

यौगन्धरायणः - वसन्तको भवान् ननु। वसन्तक! मा मैवम्।

परित्यजाम सन्तप्तं दुःखेन मदनेन च।
सुहृज्जनमुपाश्रित्य यः कालं नावबुध्यते।। ७ ।।

विदूषकः - एव्वं एव्व जरं गमिस्सामो। (एवमेव जरां गमिष्यामः।)

यौगन्धरायणः - तन्नु श्लाघ्यम्।

विदूषकः - सिळाघणीओ भवे, जदि ळोओ जाणादि। (श्लाघनीयं भवेद्, यदि लोको जानाति।)

यौगन्धरायणः - न नः कार्यं लोकेन, स्वामिप्रियार्थोऽयमारम्भः।

विदूषकः - सो वि दाव ण जाणीदि। (सोऽपि तावन्न जानाति।)

यौगन्धरायणः - काले ज्ञास्यति।

विदूषकः - कदमो दाणि सो काळो। (कतम इदानीं स कालः।)

यौगन्धरायणः - यदेयमारम्भसिद्धिः।

विदूषकः - तदो तादिसो भवं बन्धणादो राआणं अन्तेउरादो राअदारिअं उभे णिय्यादेदु। (ततस्तादृशो भवान् बन्धनाद्राजानमन्तः पुराद्रजदारिकामुभे निर्यातयतु।)

रुमण्वान् - इह भवता द्रष्टव्यम्।

यौगन्धरायणः - उभयमिति। बाढम्। इयं द्वितीया प्रतिज्ञा-

सुभद्रामिव गाण्डीवी नागः पद्मलतामिव।
यदि तां न हरेद् राजा नास्मि यौगन्धरायणः।। ८ ।।

अपि च,

यदि तां चैव तं चैव तां चैवायतलोचनाम्।
नाहरामि नृपं चैव नास्मि यौगन्धरायणः।। ९ ।।

(कर्णं दत्त्वा) अये शब्द इव। ज्ञायतां शब्दः।

विदूषकः - भो! तह। निष्क्रम्य प्रविश्य) भो! पडिउत्तदिवसविस्सम्भेण अविरळं सञ्चरन्तो जणो दीसइ। किं दाणि करम्ह। (भोस्तथा। भोः! परिवृत्तदिवसविस्रम्भेणाविरलं सञ्चरन् जनो दृश्यते। किमिदानीं कुर्मः।)

रुमण्वान् - तेन हि चतुर्द्वारमग्निगृहं, भिद्यतां न सङ्घतः।

यौगन्धरायणः - न न। अभिन्नो नः सङ्घतः। भिद्यतामरिसङ्घतः। स्वकार्यमनुष्ठीयताम्।

उभौ - तह। (तथा) (निष्क्रान्तौ।)

उन्मत्तकः - ही ही चन्दं गिळदि ळाहू। मुञ्च मुञ्च चन्दं। यदि ण मुञ्चेशि, मुहं दे पाडिअ मुञ्चावइस्सं। एशे एशे दुट्ठअश्शे परिब्भट्टे आअच्छदि। एशे एशे चउप्पहवीहिआअं। जाव णं आळुहिअ बळिं भक्खिस्सं। एशे एशे दाळअभट्टा! मं ताळेह। मा खु मा खु मं ताळेह। किं भणाशि-अम्हाणं किं पि णच्चेहि त्ति। दक्खह दक्खह दाळअभट्टा! एशे दाळअभट्टा! पुणो वि मं ताळेह इट्टिअहि। मा खु माखु ताळेह। तेण हि अहं पि तुम्हे ताळेमि। (ही ही चन्द्रं गिरति राहुः। मुञ्च मुञ्च चन्द्रम्। यदि न मुञ्चसि, मुखं ते पाटयित्वा मोचयिष्यामि। एष एष दुष्टाश्वः परिभ्रष्ट आगच्छति। एष एष चतुष्पथवीथिकायाम्। यावदेनमारुह्य बलिं भक्षयिष्यामि। एते एते दारकभर्तारः! यावदेनमारुह्य बलिं भक्षयिष्यामि। एते एते दारकभर्तारः! मां ताडयथ। मा खलु मा खलु मां ताडयत। किं भणथ-अस्माकं किमपि नृत्येति। पश्यत पश्यत दारकभर्तारः!। एते दारकभर्तारः! पुनरपि मां ताडयथ यष्टिभिः। मा खलु मा खलु ताडयत। तेन 'ह्यहमपि युष्मान् ताडयामि।)

(निष्क्रान्तः।)

तृतीयोऽङ्कः।

अथ चतुर्थोऽङ्कः।

(ततः प्रविशति भटः।)

भटः - को काळो अहं भट्टिदारिआए वासवदत्ताए उदए कीळिदुकामाए भद्दवदीपरिचारअं गत्तसेवअं ण पेक्खामि। भाव पुप्फदन्तअ! गत्तसेवअं ण पेक्खसि। किं भणासि-एसो गतसेवओ कण्डिळसुण्डिगिणीए गेहं पविसिअ सुरं पिबदि त्ति। गच्छदु भावो। (परिक्रम्य) इदं कण्डिळसुण्डिगिणीए गेहं। जाव णं सद्दावेमि। भो गत्तसेवअ! । गतसेव अ (कः कालोऽहं भर्तृदारिकाया वासवदत्ताया उदके क्रीडितुकामाया भद्रवतीपरिचारकं गात्रसेवकं न प्रेक्षे। भाव पुष्पदन्तक! गात्रसेवकं न प्रेक्षसे। किं भणसि-एष गात्रसेवकः कण्डिलशौण्डिक्या गेहं प्रविश्य सुरां पिबतीति। गच्छतु भावः। इदं कण्डिलशौण्डिक्या गेहम्। यावदेनं शब्दापयामि। भो गात्रसेवक! गात्रसेवक!।)

(नेपथ्ये)

को दाणिं एसो एत्थ राअमग्गे गत्तसेवअ! गत्तसेवअ त्ति मं सद्दावेदि। (क इदानीमेषोऽत्र राजमार्गे गात्रसेवक! गात्रसेवकेति मां शब्दापयति।)

भटः - एसो गत्तसेवओ सुरं पिबिअ हसिअ हसिअ मदिअ मदिअ जवापुफं विअरत्तळोअणो इदो एव्व आअच्छदि। एदस्स पुरदो ण चिट्ठिस्सं। (निवृत्य स्थितः।) (एष गात्रसेवकः सुरां पीत्वा पीत्वा हसित्वा हसित्वा मदित्वा मदित्वा जपापुष्पमिव रक्तलोचन इत एवागच्छति। एतस्य पुरतो न स्थास्यामि।)

(ततः प्रविशति यथानिर्दिष्टो गात्रसेवकः।

गात्रसेवकः - को दाणिं एसो एत्थ राअमग्गे गत्तसेवअ! गत्तसेवअ! त्ति मं सद्दावेदि। पाणागारादो णिक्कन्तो दिट्ठ म्हि मम सुसुरेण सुरुट्ठेण। अमुदअमळ्ळएण घिदमरिअळोणरुशिदे मंशखण्डे मुहे पक्खित्ते अ। णुसा रज्जइ पीदा जइ। अत्तां णं दण्डुज्जुआ होइ।

धण्णा सुराहि मत्ता धण्णां सुराहि अणुळित्ता।

धण्णा सुराहि ण्हादा धण्णा सुराहि संत्रविदा।। १ ।।

अधण्णा अत्तणो पुत्तदाराणं कट्ठं पिट्ठं सुणन्ता जे मूढा णरा सुसमिद्धा सुरातटाअं ण जोजअंति। ता जाणे जमळोए वा णरअं अत्थि ण त्थि अ। (क इदानीमेषोऽत्र राजमार्गे गात्रसेवक! गात्रसेवक! इति मां शब्दापयति। पानागारन्निष्क्रान्तो दृष्टोऽस्मि मम श्वशुरेण सुरुष्टेन। अमृतमल्लकेन घृतमरिचलवणरूषितो मांसखण्डो मुखे प्रक्षिप्तश्च। स्नुषा रज्यति पीता यदि। श्वश्रूर्ननु दण्डोद्यता भवति।

धन्याः सुराभिर्मत्ता धन्याः सुराभिरनुलिप्ताः।

धन्याः सुराभिः स्नाता धन्याः सुराभिः संज्ञापिताः।। २ ।।

अधन्या आत्मनः पुत्रदाराणां कष्टं पिष्टं शृण्वन्तो ये मूढा नराः सुसमृद्धाः सुरातटाकं न योजयन्ति। ततो जाने यमलोके वा नरकोऽस्ति नास्ति च।)

भटः - (उपसृत्य) भो गत्तसेवअ! को काळो तुमं अण्णेसामि। भट्टिदारिआए वासवदत्ताए उदए किळिदुकामाए भद्दवदी ण दिस्सदि। तुमं दाव मत्तो एत्थ आहिण्डसि। (भो गात्रसेवक! कः कालस्त्वामन्विष्यामि। भर्तृदारिकाया वासवदत्ताया उदके क्रीडितुकामाया भद्रवती न दृश्यते। त्वं तावन्मत्तोऽत्राहिण्डसे।)

गात्रसेवकः - जुज्जइ। सा अ णं मत्ता, सो पुरुसो वि मत्तो, अहं वि मत्तो, तुमं वि मत्तो, सव्वं मत्तसमं होइ। (युज्यते। सा च ननु मत्ता, स पुरुषोऽपि मत्तोऽहमपि मत्तः, त्वमपि मत्तः, सर्वं मत्तसमं भवति।)

भटः - सव्वं दाव चिट्ठदु। राअउळे भद्दपीठिअं णणिक्वमिअ कुदो अअं आहिण्डादि त्ति। (सर्वे तावत् तिष्ठतु। राजकुले भद्रपीठिकां ननिष्क्राम्य कुतोऽयमाहिण्डत इति।)

गात्रसेवकः - इदो आहिण्डामि, एत्थ पिबामि, एदेण पिबामि, मा संरम्भेण। किं करीअदु। (इत आहिण्डे, अत्र पिबामि, एतेन पिबामि, मा संरम्भेण। किं क्रियताम्।)

भटः - हिज्जउ असम्बन्धप्पळावो। सिग्घं भद्दवदिं पवेसेहि। (भवत्वसम्बन्धप्रलापः। शीघ्रं भद्रवतीं प्रवेशय।)

गात्रसेवकः - पविसदु पविसदु भद्दवदी। अंधो भए भद्दवदीए अङ्कुसं आढत्तं। (प्रविशतु प्रविशतु भद्रवती। अङ्घो मया भद्रवत्या अङ्कुशमाहितम्।)

भटः - सभावविणीदाए भद्दवदीए अङ्कुसेण किं कय्यं। गच्छ सिग्घं भद्दवदिं पवेसेहि। (स्वभावविनीताया भद्रवत्या अङ्कुशेन किं कार्यम्। गच्छ, शीघ्रं भद्रवतीं प्रवेशय।)

गात्रसेवकः - पविसदु पविसदु भद्दवदी। अंघो मए भद्दवदीए खुरप्पमाळा आढत्ता। (प्रविशतु प्रविशतु भद्रवती। अङ्घो मया भद्रवत्याः क्षुरप्रमालाहिता।)

भटः - पुप्फबन्धिआए भद्दवदीए खुरप्पमाळाए किं कय्यं। सिग्घं भद्दवदिं पवेसेहि। (पुष्पबन्ध्याया भद्रवत्याः क्षुरप्रमालया किं कार्यम्। शीघ्रं भद्रवतीं प्रवेशय।)

गात्रसेवकः - पविसदु पविसदु भद्दवदी। अंघो मए बद्दवदीए घण्टा आढत्ता! (प्रविशतु प्रविशतु भद्रवती। अङ्घो मया भद्रवत्या घण्टाहिता।)

भटः - उदए कीळिदुकामाए भद्दवदीए घण्टाए किं कय्यं। सिग्घं भद्दवदिं पवेसेहि। (उदके क्रीडितुकामाया भद्रवत्या घण्टया किं कार्यम्। शीघ्रं भद्रवतीं प्रवेशाय।)

गात्रसेवकः - पविसदु पविसदु भद्दवदी। अंघो मए भद्दवदीए कसिअं आढत्तं। (प्रविशतु प्रविशतु भद्रवती। अङ्घो मया भद्रवत्याः कशिका आहिता।)

भटः - कसिएण किं कय्यं। सिग्धं भद्दवदिं पवेसेहि। (कशिकया किं कार्यम्। शीघ्रं भद्रवतीं प्रवेशाय।)

गात्रसेवकः - पविसदु पविसदु भद्दवदी। अंघो। (प्रविशतु प्रविशतु भद्रवती। अङ्घो।)

भटः - किं अंघो। (किम् अङ्घो।)

गात्रसेवकः - अंधो मए। (अङ्घो मया।)

भटः - किं तुए। (किं त्वया।)

गात्रसेवकः अंघो भद्द। (अङ्घो भद्र।)

भटः -	किं भद्दत्ति। (किं भद्रेति।)
गात्रसेवकः -	अंघो भद्दवदी। (अङ्घो भद्रवती।)
भटः -	किं भद्दवदी। (किं भद्रवती।)
गात्रसेवकः -	भद्दवदी पि आढत्ता। (भद्रवत्यप्याहिता।)
भटः -	ण तुवं एत्था अवरज्झो। कण्डिळसुण्डिकिणी खु अवरज्झा, जा राअवाहणं गणिहअ सुरं देदि। (त्वमत्रापराद्धः कण्डिलशौण्डकी खल्वपराद्धा, या राजवाहनं गृहीत्वा सुरां ददाति।)
गात्रसेवकः -	अंघो मए उत्तं-मा मूळविद्धिविणासेहि त्ति। (अङ्घोमयोक्तम्-मा मूलवृद्धिं विनाशयेति।)
भटः -	हं सद्दो विअ। (हं शब्द इव।)
गात्रसेवकः -	अंघो जाणामि जाणामि, कण्डिळसुण्डिकिणीए गेहं भिन्दिअ भद्दवदी पळाअदि। (अङ्घो जानामि, कण्डिलशौण्डिक्या गेहं भित्वा भद्रवती पलायते।)
भटः -	किं भणासि (आकाशे) एसो भट्टा वच्छराओ वासवदत्तं गणिहअ णिग्गदो त्ति। (किं भणसि-एष भर्ता वत्सराजो वासवदत्तां गृहीत्वा निर्गत इति।)
गात्रसेवकः -	(सहर्षम्) अविघ्नमस्तु स्वामिनः।
भटः -	पिब पिब। अज्ज वि तुमं मत्तो आहिण्डेहि। (पिब पिब। अद्यापि त्वं मत्त आहिण्डेहि। (पिब पिब। अद्यापि त्वं मत्त आहिण्डस्व।)
गात्रसेवकः -	आः को मत्तः, कस्य वा मदः, वयं खल्वार्ययौगन्धरायणेन स्वेषु स्वेषु स्थानेषु स्थापिताश्चारपुरुषाः। यावदहमपि सुहृज्जनस्य संज्ञा करोमि। एते ते सुहृदो निरोधमुक्ता इव कृष्णसर्पा इतस्ततो निर्धावन्ति। भो भोः सुहृदः! शृण्वन्तु शृण्वन्तु भवन्तः-

नवं शरावं सलिलैः सुपूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम्।
तत्तस्य मा भून्नरकं स गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत् ।। २ ।।

क्व नु खल्वार्ययौगन्धरायणः। (विलोक्य) अये अयमत्रभवान् आर्ययौगन्धरायणः। य एषः,

निशितविमलखड्गः संहृतोन्मत्तवेषः
कनकरचितचर्मव्यग्रवामाग्रहस्तः।
विरचितबहुचीरः पाण्डराबद्धपट्टः
सतडिदिव पयोदः किञ्चिदुद्गीर्णचन्द्रः।। ३ ।।

अहो महत् प्रवृत्तं युद्धम्।

हत्वा गजान् सगजिनः सहयांश्च यौधा-
नक्षौहिणीमतिविगाह्य बलान्मुहूर्तम्।
नागेन्द्रदन्तमुसलाहतभग्नबाहु-
र्भ्रष्टायुधोऽपि ननिवृत्तपदोऽभियातः ।। ४ ।।

हा धिग्, ग्रहणमुपगतः खल्वार्ययौगन्धरायणः। यावदहमप्यार्ययौगन्धरायणस्य प्रत्यन्तरीभविष्यामि। (निष्क्रान्तः।)

भटः -	किं णु खु एदं। पाआरतोरणवज्जं सव्वं कोसम्बी खु इदं। होदु इमं वुत्तन्तं अमच्चस्स णिवेदेमि। (किन्नु खल्वेतत्। प्राकारतोरणवर्जे सर्वे कौशाम्बी खल्विदम्। भवत्विमं वृत्तान्तममात्याय निवेदयामि।)

(निष्क्रान्तः।)

(प्रवेशकः।)

(ततः प्रविशतः साधारणौ।)

उभौ -	उस्सरह उस्सरह अय्या! उस्सरह। (उत्सरतोत्सरतार्याः! उत्सरत।)

प्रथमः - अंघो कण्ठस्स दीअमाणस्स ण उच्चं विरमदि। (अङ्घो कण्ठस्य दीर्यमाणस्य नोच्चं विरमति।)

द्वितीयः - अंघो भट्टिदारिआए वासवदत्ताए अवणअणविब्भमदाए विरुवन्तस्स मे वअणं कोच्चि ण सुणादि। अंघो किं भणह-किण्णिमित्तं उस्सारणा वत्तदि त्ति। गहीदो अय्यजोअन्धराअनो असिदुदीएण अक्खोहिणीए अग्गवेगो मुहुत्तअं धारिदो। विजयसुन्दरस्स हत्थिणो दन्तन्तचोदिदो असी विवण्णो। असिदोशेण गहीदो, ण पुरुसदोसेण। (अङ्घो भर्तृदारिकाया वासवदत्ताया अपनयनविभ्रमतया विरुवतो मे वचनं कश्चिन्न शृणोति। अङ्घो किं भणथ-किन्निमित्तमुत्सारणा वर्तत इति। गृहीत आर्ययौगन्धरायणः। किं भणत-कथं गृहीत इति। शृण्वन्त्वार्याः। आर्ययौगन्धरायणेनासिद्वितीयेनाक्षौहिण्या अग्रवेगो मुहूर्तं धारितः। विजयसुन्दरस्य हस्तिनो दन्तान्तजोदितोऽसिर्विपन्नः। असिदोषेण गृहीतो, न पुरुषदोषेण।)

प्रथमः - अंघो अप्पमत्ता होह तुम्हे। पाआरतोरणवज्जं सव्वं कोसम्बी खु इअं। (अङ्घो अप्रमत्ता भवत यूयम्। प्राकरतोरणवर्जं सर्वं कौशाम्बी खल्वियम्।)

उभौ - ओदरदु ओदुरदु अय्यौ ओदरदु। (अवतरत्ववतरत्वार्योऽवतरतु।)

(ततः प्रविशति यौगन्धरायणः बद्धबाहुः फलकशयनेनानीयमानः।)

यौगन्धरायणः - अयमहमवतरामि।

रिपुगतमपनीय वत्सराजं
ग्रहणमुपेत्य रणे स्वशस्त्रदोषात्।
अयमहमपनीतभर्तृदुःखो
जितमिति राजकुले सुखं विशामि।। ५ ।।

भोः! सुखं खलु निष्कलत्राणां कान्तारप्रवेशः, रमणीयतरः खलु प्राप्तमनोरथानां विनिपातः, अपश्चात्तापकरः खलु सञ्चितधर्माणां मृत्युः। मया हि,

वैरं भयं परिभवं च समं विहाय
कृत्वा नयैश्च विनयैश्च शरैश्च कर्म।
शत्रोः श्रियं च सुहृदामयशश्च हित्वा
प्राप्तो जयश्च नृपतिश्च महांश्च शब्दः।। ६ ।।

उभौ - उस्सरह उस्सरह अय्या! उस्सरह। (उत्सरतोत्सरतार्याः! उत्सरत।)

यौगन्धरायणः - मद्दर्शनाभिलाषी जनो न कश्चिदुत्सारयितव्यः।

पश्यन्तु मां नरपतेः पुरुषाः ससत्त्वा
राजानुरागनियमेन विपद्यमानम्।
ये प्रार्थयन्ति च मनोभिरमात्यशब्दं
तेषां स्थिरीभवतु नश्यतु वाभिलाषः।। ७ ।।

उभौ - उस्सरह उस्सरह। किं तुम्हेहि ण दिट्ठपुरुवो अय्यजोअन्धराअणो! (उत्सरतोत्सरत। किं युष्माभिर्न दृष्टपूर्वं आर्ययौगन्धरायणः।)

यौगन्धरायणः - दृष्टः पूर्वं, न त्वेवम्। मम हि,

उन्मत्तच्छन्नवेषस्य रथ्यासु परिधावतः।
अवगीतमिदं रूपं कर्म सम्प्रति दृश्यते।। ८ ।।

(प्रविश्य)

भटः - अय्य! पिअं दे णिवेदेमि। गहीदो किळ वच्छराओ। (आर्य! प्रियं ते निवेदयामि। गृहीतः किल वत्सराजः।)

यौगन्धरायणः - नैतदस्ति।

चिरमरिनगरे निरोधमुक्तः
स किल वनान्युपलभ्य भद्रवत्या।

ग्रहणमुपगमिष्यति प्रयातो
निमिषितमात्रगतेषु योजनेषु।। ९ ।।

भद्र! कथं गृहीत इति श्रुतम्।

भटः - अणुसारिअ णळागिरिणा गहीदो किळ। (अनुसार्य नलागिरिणा गृहीतः किल।)

यौगन्धरायणः - अस्ति वाहनसामर्थ्यम्। असमायुक्तस्तु सः।

गजस्याधोरणायुक्तो जवो भवति शिक्षया।
विमुक्तं वत्सराजेन क एनं वाहयिष्यति।। १० ।।

भटः - अय्य! अमच्चो आह-आउहागारे चिट्ठदु किळ अय्यो। पुरुसगुतो अअं देसी त्ति। (आर्य! अमात्य आह-आयुधागारे तिष्ठतु किलार्यः। पुरुषगुप्तोयं देश इति।

यौगन्धरायणः - अहो हास्यमभिधानम्।

अग्निं बद्ध्वा वत्सराजाभिधानं
यस्मिन् काले सर्वतो रक्षितव्यम्।
तस्मिन् काले सुप्तमासीदमात्यै-
र्नीते रत्ने भाजने को निरोधः ।। ११ ।।

(परिक्रम्य)

भटः - इदं आहुहागारं। पविसदु अय्यो। (इदमायुधागारम्। प्रविशत्वार्यः।)

(प्रविश्य)

भटः - अमच्चो आह-अवणीअदु बन्धणं त्ति। (अमात्य आह - अपनीयतां बन्धनमिति।)

यौगन्धरायणः - अक्षीणं नां कुरु। व्यक्तं भरतरोहको मां द्रष्टुभिच्छति। अहमपि तावद् भरतरोहकं द्रष्टुमिच्छामि।

मद्वाक्यैः परिखिद्यमानहृदयं रोषात् प्रमत्ताक्षरैः
प्रारब्धेषु नयच्छलेषु तुलितं तुल्याधिकारोज्झितम्।
सूक्तैः शास्त्राविनिश्चितैर्विरहितं बुद्ध्याधिकं वञ्चितं
द्रष्टुं मल्लमपक्रियाविनिहतं व्रीलादिवाधोमुखम्।। १२ ।।

भरतरोहकः - क्वासौ क्वासौ यौगन्धरायणः।

अवसितनिजकार्यं वञ्चनैर्दुर्निरीक्षं
कथमिव परिभाषे भर्तुरर्थे विपन्नम्।
चिरमवनतकार्यं चापि निर्युक्तमन्त्रं
भुजगमिव सरोषं घर्षितं चोच्छ्रितं च।। १३ ।।

भटः - अय्यजोअन्धराअणो अय्यं पडिवाळअन्तो आउहागारे चिट्ठइ। (आर्ययौगन्धरायण आर्यं प्रतिपालयन् आयुधागारे तिष्ठति।)

भरतरोहकः - भवतु भवतु।

मन्त्रित्वे वञ्चितो ह्येष सव्याजं नीलहस्तिना।
प्रत्यादेष्टुं स तद्वैरं मामिदानीं प्रतीक्षते ।। १४ ।।

भटः - अय्य! एसो अमच्चो। (आर्य! एषोऽमात्यः।)

भरतरोहकः - (उपगम्य) भो यौगन्धरायण!

यौगन्धरायणः - भोः !।

भटः - अहो सरस्स गमम्भीरता। अय्यस्स एकक्खरेण पूरिदो अयं देसो। (अहो स्वरस्य गम्भीरता। आर्यस्यैकाक्षरेण पूरितोऽयं देशः)

भरतरोहकः - (उपविश्य) भोः!। यौगन्धरायण इत्यशरीराण्यक्षराणि श्रूयन्ते। दिष्ट्या भवान् दृश्यते।

यौगन्धरायणः - दिष्ट्या भवान् हश्यत इति। पश्यतु भवान् माम्,

एवं रुधिरदिग्धाङ्गं वैरं नियममास्थितम्।
गुरोरवजितं हत्वा शान्तं द्रौणिमिव स्थितम्।। १५ ।।

भरतरोहकः - अहो छलेनागतगजारम्भस्यात्मसम्भावना।

यौगन्धरायणः - किं छलेनेति। तत् पुनरिदानीं युक्तम्।

या सा मल्लिकसालवृक्षरचिता नागाश्रिता वञ्चना
बद्धः सेवितवान् हि नो नरपतिर्बाहूपधानां क्षितिम्।
राज्ञो वारणनिग्रहे परिचयाद् वीणाश्रिता वञ्चना
पूर्वं प्रस्तुतमेव यामि भवता नैवापराधो मम।। १६ ।।

भरतरोहकः - भो यौगन्धरायण! यदग्निसाक्षिकं महासेनस्य दुहितरं शिष्यां प्रतिगृह्य अदत्तापनयनं कृतं, युक्तेयं भोस्तस्करप्रवृत्तिः।

यौगन्धरायणः - मा मा भवानेवम्। विवाहः खल्वेष स्वामिनः।

भरतानां कुले जातो वत्सानामूर्जितः पतिः।
अकृत्वा दारनिर्देशमुपदेशं करिष्यति।। १७ ।।

भरतरोहकः - अद्यापि महासेनेन प्रयुक्तसत्कारो वत्सराजः। तदिदानीं किं नावेक्षते।

यौगन्धरायणः - मा मा भवानेवम्।

यदस्य चाज्ञां कुरुते नलागिरिः स शिक्षितानां वचनेषु तिष्ठति।
ततो विमुक्तः स्वशरीररक्षणे यशः प्रदातुं सुहृदां च जीवितम्।। १८ ।।

भरतरोहकः - यद्येवं नलागिरिग्रहणार्थं विमुक्तश्चेद् न पुनर्बद्धस्ते स्वामी।

यौगन्धरायणः - नेति पश्यत्युपक्रोशभयात्।

भरतरोहकः - अपरोक्षराज्यव्यवहारो भवानिति ब्रवीति। समरावजितेषु शत्रुषु किमाह शास्त्रम्।

यौगन्धरायणः - वधः।

भरतरोहकः - वधार्हो वत्सराजश्चेत् किमस्माभिः स सत्कृतः।

यौगन्धरायणः - एतदवेक्ष्य खलु यदस्य शरीरं नापहतम्।

भरतरोहकः - एतदपि सम्भाव्य मन्यते स्वामी।

यौगन्धरायणः - कः संशयः।

हस्तप्राप्तो हि वो राजा रक्षितस्तेन साधुना।
न ह्यनारुह्य नागेन्द्रं वैजयन्ती निपात्यते।। १९ ।।

भरतरोहकः - भवतु भवतु।महासेनस्य प्रतिकूलं कृत्वा कौशाम्बीं प्रति का कृता ते बुद्धिः।

यौगन्धरायण - अहो हास्यमभिधानम् ।

भवतां चाग्रतो यातः शेषकार्येषु का कथा।
समूलं वृक्षमुत्पाट्य शाखाश्छेत्तुं कुतः श्रमः ।। २० ।।

(प्रविश्य)

काञ्चुकीयः - (कर्णे) एवमिव।

भरतरोहकः - प्रकाशमुच्यताम्।

काञ्चुकीयः - कारणैर्बहुभिर्युक्तैः कामं नापकृतं त्वया।
गुणेषु न तु मे द्वेषो भृङ्गरः प्रतिगृह्यताम्।। २१ ।। इति।

यौगन्धरायणः - हा धिक्।

गृहा न निर्वान्ति मया प्रदीपिता
स्तथैव तावद् हृदयानि मन्त्रिणाम्।
इयं तु पूजा मम दण्डधारिणः
कृतापराधस्य हि सत्कृतिर्वधः ।। २२ ।।

(नेपथ्ये हाहाकारः क्रियते।)

भरतरोहकः - अये,

को नु खल्वेष सहसा प्रासादाग्राद् विनिः सृतः।
श्येनपक्षाभिमृष्टानां कुररीणामिव ध्वनिः ।। २३ ।।

काञ्चुकीयः - यदाज्ञापयत्यार्यः। (निष्क्रम्य प्रविश्य) एषा तत्रभवत्यङ्गारवती शोकाभिभूतहृदया प्रासादाच्छरीरं विमोक्तुकामा महासेनेनाभिहिता यथा-क्षत्रधर्मणोद्दिष्टस्ते दुहितुर्विवाहः। किमिदानीं हर्षकाले सन्तप्यसे। तच्चित्रफलकस्थयोर्वत्सराजवासवदत्तयोर्विवाहोऽनुष्ठीयताम् इति। तत्र हि,

स्त्रीजनेनाद्य सहसा प्रहर्षव्याकुलक्रमा।
क्रियते मङ्गलाकीर्णा सबाष्पा कौतुकक्रिया।। २४ ।।

यौगन्धरायणः - एवं सम्बन्धं मन्यते महासेनः। तेन ह्यानीयतां भृङ्गरः।

काञ्चुकीयः - गृह्यताम्। (उपनयति)

भरतरोहकः - भो यौगन्धरायण! किं ते भूयः प्रियमुपहरति महासेनः ।

यौगन्धरायणः - यदि मे महासेनः प्रसन्नः, किमतः परमिच्छामि।

(भरतवाक्यम्)

भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ।। २५ ।।

(निष्क्रान्ताः सर्वे।)

चतुर्थोऽङ्कः ।

प्रतिज्ञानाटिकावसिता।